श्रीगुरुभ्यो नमः

ब्रह्ममीमांसात्रिशती

ब्रह्मसूत्रार्थ सङ्ग्रहात्मिका

ब्रह्मश्री आङ्गरै. रङ्गस्वामि शास्त्रिणा
विद्यार्थिनामुपकाराय विरचिता
पण्डितैः परिशोधिता

कुम्भघोणे
द्रणालये मुद्रापिता
शिता च
सिंहमासि

१९४९

मूल्यम् १-४-०

श्रीगुरुभ्यो नमः

ब्रह्ममीमांसात्रिशती

ब्रह्मसूत्रार्थ सङ्ग्रहात्मिका

ब्रह्मश्री आङ्गरै. रङ्गस्वामि शास्त्रिणा
विद्यार्थिनामुपकाराय विरचिता
पण्डितैः परिशोधिता

कुम्भघोणे
श्रीवेङ्कटेश्वरमुद्रणालये मुद्रापिता
प्रकाशिता च
विरोधिसिंहमासि

१९४९

मूल्यम्

इयं त्रिशती

श्रीसद्गुरु चरणारविन्दयोः

सभक्तिप्रणामं

समर्पिता ॥



श्रीः

श्रीमत्परमहंस परिव्राजकाचार्यवर्य
श्री जगद्गुरु श्रीमच्छङ्करभगवत्पादप्रतिष्ठित-
श्री काञ्ची कामकोटि पीठाधीश्वर
श्री चन्द्रशेखरेन्द्रसरस्वती श्रीपादैः
क्रियते नारायणस्मृतिः ॥

अस्मदत्यन्तप्रियशिष्यैः आङ्गरैयग्रहाराभिजनैः ब्रह्मश्रीसंपन्न-राधाकृष्णतनूजैः श्री रङ्गस्वामिशास्त्रिभि र्विरचितां मस्मत्सन्निधौ उपहृत्य श्राविता ब्रह्ममीमांसात्रिशत्याख्यां ब्रह्मसूत्रवृत्तिं समालोच्य सन्तुष्यामः । एषा शारीरकशास्त्रगत तत्तदधिकरणानां साङ्गानां पूर्वोत्तरपक्ष युक्तिसनाथानां सुलभं स्वरूपप्रदर्शनेन श्रुतिसूत्रभाष्यादि तात्पर्यविशदीकरणेन च व्युत्पित्सूनामुपकुर्वन्ती श्री चन्द्रमौलीशकृपया विशिष्टं प्रचारं प्राप्नुयात् । ग्रन्थरचयितारः शास्त्रिणश्च श्वःश्रेयससन्तती रधिगच्छन्त्विति च आशास्महे ॥

विजययात्रास्थानं-श्री मध्यार्जुनक्षेत्रं
विरोधिनाम सं. आश्विनशुद्धदशमी — नारायणस्मृतिः
स्थिरवासरः

विज्ञापना

आर्याः

"व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने" इत्यभियुक्ताः ! वेदान्तवाक्यकुसुमग्रथनार्थानि सूत्राणि, वेदान्तवाक्यानि हि सूत्रैः उदाहृत्य विचार्यन्ते, इति च भगवत्पादाः । 'ब्रह्मसूत्रपदैश्चैव हेतुमद्भिः विनिश्चितैः, इति च गीतं भगवता -- तानि च ब्रह्मसूत्राणि ५५५ पञ्चपञ्चाशदधिकपञ्चशत संख्याकानि, तानि च १९२ – द्विनवत्यधिकशतानां अधिकरणानां रचनया व्याचख्युः श्रीशङ्कर-भगवत्पादाचार्याः साक्षाच्छिवावतारभूताः। तदर्थश्चातिगभीरतया दुरवगाहो मन्दमनीषैः। मेधाविनां सुग्रहोऽपि सद्यो विस्मरणपथ-मधिरोहति विक्षिप्तचित्तानां, अतः पूर्वेषां सुग्रहणाय परेषां अवि-स्मरणाय च कमपि प्रयत्नं चिकीर्षुणा मया गुरुकृपाप्रेरितेन सूत्रार्थविषयवाक्यसंशय संगतिपूर्वपक्षसिद्धान्तप्रदर्शनपूर्वकं तदु-पयोगिव्याख्यानविषयांश्च संयोज्य ब्रह्ममीमांसापद्यत्रिशती पद्मस्रगिव प्रबद्धा । तामेतां कण्ठे कुर्वन्तः सफलयेयुः मम परिश्रमं विद्यारसिकाः इति विश्वसिमि । मुद्राप्रमादजन्यान् दोषांश्च संशोध्य समनुगृण्हीयुरिति प्रार्थये ।

इति सुधीजनविधेयः

आङ्गरै. रा. रङ्गस्वामिशास्त्री ।

रामम्न्दिर वेदान्तपाठशाला

प्रधानपण्डितः

कुम्भघोणम्

१५–९–४९



आत्रेयो रङ्गनाथः श्री राधाकृष्णात्मसम्भवः ।
श्रीमती गर्भजो ब्रह्ममीमांसात्रिशतीं व्यधात् ॥

श्रीः

॥ श्रीगुरुभ्यो नमः ॥

ब्रह्ममीमांसा त्रिशती

श्रीमच्छङ्करभगवत्पादाचार्यान् प्रणम्य तत्कृपया ।
ब्रह्मविचारत्रिशतीं पद्यैर्हृद्यैर्निबध्नामि ॥

॥ अथ जिज्ञासाधिकरणम् ॥

ब्रह्मात्मैक्य विचार एष कथमप्यश्रेन्न कृत्यर्हताम्
यस्मादस्य विचारणीयविषयो वन्ध्यातनूजायते ॥
सर्वज्ञत्वमुखा हि धर्मनिवहाः ब्रह्मण्यतोन्यत्र तु
स्वल्पज्ञत्वमुखास्तदग्निजलवद्भेदः प्रसिद्धः खलु ॥ ॥ १ ॥

एतेनैव फलं न सिद्ध्यति तवाभीष्टं यतः सत्यतां
आवैरिञ्चमथाप्यवीचिनिरयादाघोषयन्त्यागमाः ।
अभ्यासोऽपि न सिद्ध्यति स्फुटतरं भेदेन बुद्ध्यात्मनोः
भानाद्रज्वहिवत्तदात्मकतया दृष्टा न चास्ति प्रमा ॥ २ ॥

जीवस्य ब्रह्मतायाः सुसुखमवगतेर्नापिकार्यो विचारः
न स्फीतालोकमध्ये कलशविषयकं संशयं कश्चिदिच्छेत् ।
निस्सारे चापि नार्हा कलयितुमफला बुद्धिमद्भिः परीक्षा
यस्मात्काकस्य दन्ता न हि क्वचिदपि ग्राम्ययुवैं परीक्षाम् ॥ ३

॥ अथ आनन्दमयाधिकरणम् ॥

पुच्छं ब्रह्म प्रधानं कथयसि यदि वा जीवमानन्दपूर्णं
जीवोऽत्र स्वप्रधानं नतु तदवयवो ब्रह्म युक्तं प्रधानम् ।
तत्ताद्दक्प्रायपाठादिति हि निपतितं पूर्वपक्षं निराह
ब्रह्मैव स्वप्रधानं निगमनपठित श्लोकगाभ्यासवत्वात् ॥ १४ ॥

प्राचुर्यादपि पुच्छगीः प्रववृते ह्याधारताबोधिका
षष्ठाग्नेरपि काण्वसूक्तिषु तथा संपात्तिरिष्टायतः ।
तद्धेतु व्यपदेशतः प्रकरणादानन्दयोगोक्तितः
कोशातीत विशुद्धचिचदितरापोहेन संसाधिंता ॥ १५ ॥

॥ अथ अन्तस्तद्धर्माधिकरणम् ॥

आदित्यान्तरुपास्य ईश्वर उतस्याज्जीव एवेत्युभौ
पक्षौ प्राप्नुत आदिमोर्हतिपरं सिद्धान्तकोटिस्थितिम् ।
नान्त्यः सर्वविधत्व सर्वदुरितोत्थित्वादि धर्मायतः
जीवे न प्रसरन्ति रूपयुतता त्वीशेऽपि मायामयी ॥ १६ ॥

॥ अथ आकाशाधिकरणम् ॥

उद्गीथे सम्पदुक्ता वियत उतभवेद्ब्रह्मणो व्योम्न एव
स्यादाकाशश्रुतेः साभवति बलवती ब्रह्मलिङ्गात्समस्तात् ।
इत्येवं पूर्वपक्षे निपतति परमं ब्रह्मसंपाद्यमत्राहा-
नान्त्यं नान्यगामि श्रुतिरपि कुहचिद्बाधनार्हैव लिङ्गैः ॥ १७

॥ अथ प्राणाधिकरणम् ॥

प्रस्तावानुगतं च किं खलु भवेद्ब्रह्मोतमुख्योऽसुरि-
त्येवं संशयमाप्य मुख्यमसुभेदोरीचकारेतरः ।
तल्लिङ्गं खलु देवतात्वमिह चाप्यस्त्येव तस्मात्सखे
प्रस्तावानुगतं परं हि भवति ब्रह्मेत्यवादीन्मुनिः ॥ १८ ॥

॥ अथ ज्योतिश्चरणाधिकरणम् ॥

ज्योतिर्दिवः परमतो यदुपास्यमुक्तं
तद्भौतिकं किमु भवेदथवेश्वरः स्यात् ।
ज्योतिर्भवेद्रविमुखं बहुलिङ्गवत्वात्
न ब्रह्म तद्गमकलिङ्ग विहीनतायाः ॥ १९ ॥

इत्थं प्राप्तं पूर्वपक्षं निराह व्यासो
यस्मात् पूर्ववाक्येऽस्ति लिङ्गम् ।
पादत्वोक्ति ब्रह्मणो यद्दिवीति
द्योस्संबन्धाच्चात्र तत्प्रत्यभिज्ञा. ॥ २० ॥

नो गायत्रीच्छन्दसो भूतपात्त्वं छन्दोद्वारा चेतसोह्यर्पणाऽत्र ।
नो वा पञ्चम्यर्थभेदे प्रमाणं सप्तम्यर्थे पञ्चमी चाविरुद्धा ॥ २१

॥ अथ प्रतर्दनाधिकरणम् ॥

प्राणः प्रातर्दने यो भजति विषयतामिन्द्रसंवादवाक्ये
जीवोऽसौ प्राणशक्रावथ भवति परंब्रह्मवा संशयेऽस्मिन् ।

लिङ्गानां भूयसां किंविषयमतिबलं किञ्च दौर्बल्ययुक्तं
स्यादित्येवं विचारे मुनिरनुगमतो ब्रह्मसिद्धान्तमाह ॥ २२ ॥

जीवास्त्वन्योऽध्यात्मसंबन्धहीनः
तौ नोपास्यौ त्रीणि हि स्युस्तदानीम् ।
विज्ञानानीत्येकवाक्यत्वयोगात्
एकं ब्रह्म ज्ञेयमत्रोपदिष्टम् ॥ २३ ॥

इत्थं स्पष्टब्रह्मलिङ्गश्रुतीनां
ब्रह्मण्यस्थाप्यद्वितीये ऽर्थवत्त्वम् ।
आद्याध्यायस्यादिमेनाङ्घ्रिणाथ
द्वैतीयीके ऽस्पष्टतल्लिङ्गवाचाम् ॥ ॥ २४ ॥

इति प्रथमाध्याये प्रथमः पादः समाप्तः

॥ अथ द्वितीयपादः ॥

॥ सर्वत्र प्रसिद्धाधिकरणम् ॥

शारीरो हि मनोमयोऽत्र भवितुं युक्तो मनः प्राणयोः
अस्यैवोपकृति प्रसिद्धिरमनः प्राणस्य न ब्रह्मणः ।
इत्थं पूर्ववचो न कर्तुमुचितं सर्वत्र सिद्धागुणाः
ये सर्वात्मकतामुखा न खलु ते जीवे प्रसिद्धाः सखे ॥ २५ ॥

अल्पस्थानकृताप्युपास्तिविधये साकेतनाथस्त्ववत्
रामे स्यादणुता स्वभावमहतोऽप्यौपाधिकी व्योमवत् ।
संभोगाद्यपि न प्रसक्तिमयते वैशेष्यभाजौ यतः
शारीरश्च तथेश्वरश्च तदलं शुष्कैः कुतर्कैः कृतैः ॥ ॥ २६ ॥

॥ अथ अत्त्रधिकरणम् ॥

अत्ता जीवोऽग्निरीशो यमवचनमुखेनेर्यते काठकैरि-
त्यापातात्सन्दिहानं प्रतिवदति पुनर्जीव एवेतिकश्चित् ।
सिद्धान्ती तं निराह स्थिरचरजगतां नाशकत्वं यतोऽत्त
स्वारस्यं याति सर्वात्तरि परमशिवे नेतरस्मिन् सुसाधम् ॥

॥ अथ गुहाधिकरणम् ॥

पातारौ विदितावुभौ खलु मनो जीवावुतात्मेश्वरौ
पूर्वःकल्प इहावकाशमयते पानक्रियायोगतः ।
आत्मत्वादुभयोस्तथा हि वचनं श्रौतं दरीदृश्यते
लोकेऽप्यस्य पशोर्द्वितीय इति तत् सिद्धं हि कल्पान्तरम् ॥ २८

॥ अन्तराधिकरणम् ॥

अक्ष्णोभ्यन्तरपूरुषः किमुभवेच्छायोत जीवः परः
ब्रह्मान्यः सहि दृश्यते इति परामश्चेत्प्रथामञ्जसा ।
नैवं पुष्कर पर्णतोयन यतः पापक्षयः श्रूयते
ब्रह्मन्वे स सुखं घटेत गुरुणा वक्तव्यताप्यस्य हि ॥ २९ ॥

छायात्मा ह्यनवस्थितो न च भवेज्जीवेऽमृतत्वादिकं
संयद्वामसुभामनीत्वमुखरा नाक्षस्यमीयुर्गुणाः ।
योगिज्ञान विशेषकर्मपरता दृष्टेः प्रसिद्धेरपि
नेताग्न्युक्त सुखाभ्ररूपपरमं ब्रह्मैव तत्राभ्यधात् ॥ ३० ॥

॥ अन्तर्याम्यधिकरणम् ॥

अन्तर्याम्यमृतः श्रुतौ निगदितः शारीर आहो भवेत्
योगीकश्चिदुत प्रधानमथवा सर्वेश्वरः स्यादिति ।
सन्देहे चरमो न देहविरहादित्यापतन्तं बलात्
आहैकोह्यधिदैवतादिषु भवेत्तद्धर्मभागीश्वरः ॥ ३१ ॥

न स्मार्तं तद्भिन्न धर्माभिलापात्
नो शारीरो भिन्नएषोह्यधीतः ।
अन्तर्यन्तुः काण्वमाध्यान्दिनीय
श्रुत्योर्योगी साधनापेक्षको हि ॥ ॥ ३२ ॥

॥ अदृश्यत्वाधिकरणम् ॥

अद्रेश्यत्वादिधर्मी प्रकृतिरुतपरं ब्रह्मशारीरको वा
दृष्टान्तानामचित्त्वादुचितमविदितं सांख्यसिद्धं प्रधानम् ।
जीवोवेति प्रसक्तं परिहरति मतं ब्रह्मधर्मोक्तिहेतोः
भेदाद्व्यावर्तनाच्चोभयमपि न भवेत्ब्रह्मवेद्यं त्विहेति ॥ ३३ ॥

॥ अथ वैश्वानराधिकरणम् ॥

वैश्वानरो भवति जीव उताग्निदेवः
कौक्षेय वह्निरथ भूतमुतेश्वरो वा ।

नान्त्योऽग्निशब्दत इति प्रणुदन्मतं श्री-
व्यासोऽब्रवीदिह हि शब्दविशेषरूपम् ॥ ३४ ॥

साधारणौ यदपि तौ भवतोऽग्निशब्दः
त्रिश्वात्मशब्द उभयोस्तदपीश एव ।
सर्वात्मकत्व सकलाघविदाहनाद्यैः
ध्येयस्तदन्यदपि नेयमुपासनार्थम् ॥ ॥ ३५ ॥

उपास्य बहुलास्पष्ट ब्रह्मलिङ्गगिरामिह ।
समन्वयः साधितः श्रीशङ्करे परमेश्वरे ॥ ॥ ३६ ॥

॥ इति प्रथमाध्याये द्वितीयः पादः समाप्तः ॥

॥ अथ तृतीयः पादः ॥

॥ द्युभ्वाद्यधिकरणम् ॥

द्युभ्वाद्यायतनं प्रधानमथवा जीवः परं ब्रह्म वा
सूत्रात्माप्यथवा गुणत्रयविशिष्टाव्याकृतं तद्भवेत् ।
इत्थं संशयमग्रमानसममुं सेतुश्रुतेः कारणात्
ब्रह्मान्यः कतमोऽपि युक्ततर इत्यातिष्ठमानं प्रति ॥ ३७ ॥

ब्रह्मेत्याह स्वशब्दादितर फणितिनिर्मोकगम्यत्ववाचा
कस्मिन्नित्यादिना तत्प्रकरणवशतो द्वासुपर्णेति वाक्ये ।
औदासीन्यस्थितिं सङ्गमयितुमपि चाज्ञातपूर्वस्य तस्यै-
वापेक्षा सन्निधानाद्धृतिगुणवशतो सेतुशब्दोपपत्तेः ॥ ३८ ॥

॥ अथ अङ्गुष्ठाधिकरणम् ॥

अङ्गुष्ठमात्र इति यः प्रमितः सजीवः

न ब्रह्म मानविरहादिति चेन्न शब्दात् ।

ईशान इत्यखिल भूतभविष्यदादेः

मानन्तु जीवगमनूद्यत इत्यवेहि ॥ ॥ ४८ ॥

॥ अथ देवताधिकरणम् ॥

अङ्गुष्ठस्य वशान्मनुष्यविषयं शास्त्रं समास्थापितं

तत्प्रासङ्गिकदेवताद्यधिकृति न्यायद्वये चिन्त्यते ।

मर्त्यानामुपरिस्थिता अपि सुरा विद्याधिकारं जुषन्ति

इत्थं स्वीयमतं जगाद पुरतः सिद्धान्तसूत्रे मुनिः ॥ ४९ ॥

तेषामप्यधिकारवर्णनमिदं तेषां शरीरादिकम्

हित्वाऽयुक्तमतश्च कर्मणि महान् प्रादुर्भवेद्विप्लवः ।

नैवं वाच्यमनेकधात्व महिमा दृष्टो हि तेषां श्रुतौ

भूयोभिश्च नमस्क्रियेत हि महानेकस्त्वभोज्योपि सन् ॥ ५०

देवानां रूपवत्त्वे ननु निगमगिरामप्रमाणत्वदोषः

प्रादुःष्यात् पौरुषेयत्वकृत इति च नोशङ्कनीयं यतोऽतः ।

शब्दादेव प्रभूतिं जगत उपदिशत्यादितेयादिकस्य

प्रत्यक्षं च स्मृतिश्चाप्युपबलयति तत्प्रायशो मोक्षधर्मे ॥ ५१

यथा मध्वादि विद्यासु सामर्थ्यं दुर्घटं तथा ।

सर्वास्वपीति नो शङ्क्यमस्ति ह्येषां तदौचिती ॥ ५२ ॥

ज्योतिर्मण्डल एव सूर्यमुखराः शब्दाः प्रयुज्यन्त इ-
त्यस्मादप्यधिकारवारणमहो कर्तुं न शक्यं त्वया ।
लोके शिल्पिभिरर्थवादवचनै र्वेदे पुराणादिके-
ष्वप्यन्यत्र सरूपदेववपुषि प्रायः प्रथादर्शनात् ॥ ५३ ॥

॥ अथ अपशूद्राधिकरणम् ॥

शूद्रा अप्यधिकारिणः स्युरमृतप्राप्त्यर्थितासंभवात्
रैक्वेनाभिनिमन्त्रणश्च गमकं शूद्रेति जानश्रुतेः ।
'तस्माच्छूद्र', इति श्रुतिस्तु यजनेष्वेवाधिकारापहा
न ज्ञाने पुरुषार्थसाधनतमे तेषामतोऽस्त्यर्हता ॥ ५४ ॥
इत्यत्राह विनिर्णयं मुनिवरः सूत्रात्बहिः योग्यता
नैषामध्ययनस्य निन्दिततया तत्पूर्विका सा कुतः ।
जानश्रुत्यभिमन्त्रणाच्च शुचमस्याख्यापयत्युद्गतां
रैक्वः स्वस्य परोक्षवित्त्वगतये, पौराणिकी त्विष्यते ॥ ५५ ॥

॥ अथ कम्पनाधिकरणम् ॥

यस्मिन्नेजति निःसृतं जगदिदं प्राणः स किं वेश्वरो
वेत्येवं विशये विनिर्णयति हि ब्रह्मेति सूत्रे मुनिः ।
यस्माद्भीतिरशेषजन्तुविततेः तत्कम्प हेतुः श्रुतौ
भीषादस्मादिति मृत्युना मुनिभुवे वक्तुं च तत्प्रस्तुतम् ॥ ५६

॥ अथ ज्योतिरधिकरणम् ॥

परं ज्योतिः प्राप्यं यदिह निगमान्ते निगदितं
तदादित्याद्यं वा किमुत परमं ब्रह्म भवति ।

इतीक्षयामाह प्रकरणवशाद्ब्रह्म मुनिराट्
प्रपञ्चार्थं भूयो विधिगदित मिन्द्राय विशदम् ॥ ५७ ॥

॥ अथ अर्थान्तरत्वाधिकरणम् ॥

आकाशः खलु नाम रूप जगतोर्निर्वाह कर्तेति यः
छान्दोग्ये श्रुत एष किं वियदुत ब्रह्मेति वा संशये ।
ब्रह्मार्थान्तरता यतोऽत्र जगतो निर्दिश्यते तत्सखे
नोभूतं गगनं परन्तु परम ब्रह्मेति निर्धार्य ॥ ५८ ॥

॥ अथ सुषुप्त्युत्क्रान्त्यधिकरणम् ॥

योऽयं विज्ञानमयः जीवो वा स्यात् परोऽथवा नाद्यः ।
सुप्तावुत्क्रान्तौ च व्यपदेशाज्जीवतः पृथक् ब्रह्म ॥ ५९ ॥

इति ज्ञेयप्रधानानामस्पष्टब्रह्म लिङ्गिनाम् ।
वचनानां परे ब्रह्मण्यन्वयः साधितो नयैः ॥ ६० ॥

॥ इति प्रथमाध्याये तृतीयः पादः समाप्तः ॥

॥ अथ चतुर्थः पादः ॥

अथो तुरीयपादेन पदमात्रसमन्वयः ।
क्रियते प्रायशः साङ्ख्य निराकरणपूर्वकम् ॥ ६१ ॥

॥ अथ आनुमानिकाधिकरणम् ॥

एकेषां खलु शाखिनामनुमतं व्यक्तेतरत्कारणं
सांख्योक्तं परतानिरूपणवचस्यव्यक्तशब्दश्रुतेः ।

मैवं तत्खलु देहरूपकपरं सूक्ष्मस्य चाव्यक्तता
गोशब्देन च गव्यमाह निगमः कार्यं प्रकृत्या वदन् ॥ ६२

॥ अथ चमसाधिकरणम् ॥

अजामन्त्रो नूनं कपिलमतसिद्धं कथयति
प्रधानं तत्पाङ्ख्यं श्रुतिमदिति बुद्धिं न कलयेः ।
यतस्तेजोवन्न त्रितयमुतमूलप्रकृतिकां
पराधीनां मायामिह चमसवत्प्राह निगमः ॥ ६३ ॥

॥ अथ न सांख्योपसंग्रहाधिकरणम् ॥

पञ्च पञ्चजना इतीदृश वेदबोधितमस्त्यतः
कापिलं मतमादृतं खलु तत्त्व संप्रतिबोधनात् ।
नैवमस्त्यतिरेकतोऽनुगमश्च नास्ति हि पञ्चके
पञ्चमानुषवाचकः स हि शब्दशास्त्र समीक्षया ॥ ६४ ॥

॥ कारणत्वधिकरणम् ॥

वेदान्ता विप्लुतार्था, न भवति गतिसामान्यमेषां यतस्ते
ह्याकाशादिं क्वचिच्चानल मुखमवदन्सर्गमप्यक्रमेण ।
मैवं कार्ये विगानेऽप्यतिविशदतया कारणे सङ्गतिस्तां
सद्ब्रह्मात्मादि शब्दैरुपनिषदुदितां सम्यगीक्षस्व विद्वन् ॥ ६५

॥ अथ जगद्वाचित्वधिकरणम् ॥

बालाकिं प्रति भूपतिर्यदवदत्संवेदितव्यं स किं
प्राणः यत्तदथवा शरीर्यथपरं ब्रह्मेति कोटित्रये ।

धर्मस्पन्दनयोः प्रसिद्धतरता यत्कर्मशब्दे स्थिता
तस्माद्ब्रह्म न वेदितव्यमिति संप्राप्तोऽत्र पक्षस्तु यः ॥ ६६ ॥
तत्राह श्रुतिपारदृङ्मुनिवरो रूढयोर्मिथोऽसङ्गतौ
योगो ह्यनिमिषतीति सिद्धनयतः प्राप्तां जगद्वाचितां ।
कर्मेत्यस्य तथा च सर्वजगतां कर्ता परेशान इ-
त्यन्यद्व्याकृतपूर्वमेव सकलं प्रातर्दनन्यायतः ॥ ६७ ॥

॥ अथ वाक्यान्वयाधिकरणम् ॥

आत्मा द्रष्टव्यइत्याद्यभिहितमृषिणा याज्ञवल्क्येन पत्न्यै
सोयं किं जीवएवेत्युचितमथपरं ब्रह्मवेत्याकुलःसन् ।
आदौ मध्ये तथान्ते प्रिय मृति मति कृत्वादिमुख्यैस्तदीयैः
लिङ्गैर्जीवोभवेदित्यकृतदृढतरं पूर्वपक्षं हि वादी ॥ ६८ ॥
सिद्धान्तं तत्र तावद्वदति मुनिवरो ह्येकविज्ञानतो यत्
सर्वं विज्ञातमेवेत्यपि च दृढतरा संचकास्ति प्रतिज्ञा ।
वाक्यं चान्वेति पूर्वापरगत विषयालोचनायां कृतायां
जीवाभेदाय सर्वं भवदुतितमतो ज्ञेय आत्माऽत्र शुद्धः ॥६९
मतत्रयमुपन्यस्य काशकृत्स्नमतस्य च ।
श्रुतिमत्तां जगौ भूयोमानोपन्यास पूर्वकम् ॥ ७० ॥

॥ अथ प्रकृत्यधिकरणम् ॥

जन्माद्यस्येति सूत्रे यदुत कथितवान् ब्रह्मणः कारणत्वं
तात्किं कर्तृत्वरूपं भवति किमथवा हेतुसामान्यरूपम् ।

एवं प्राप्ते विचारे कथयति मतिमान् पूर्वपक्षी घटादेः
कर्तृत्वं कुम्भकारे भवति च परमं चेतनं ब्रह्म कर्तृ ॥ ७१ ॥
इत्याक्षेपं निराह प्रकृतिरपि भवेद्ब्रह्मयद्भेदनेन
ह्यन्यत्सर्वं च भूयाद्विदितमिति यतो नोपरून्ध्यात्प्रतिज्ञा ।
दृष्टान्ताश्चापि वीणामृदुदधिमुखरा नोपरोधं भजेरन्
सच्चत्यच्चाभवच्चेत्यपि निगमगिरः तत्त्वमाचक्षतेऽद्धा ॥ ७२ ॥

॥ अथ सर्वव्याख्यानाधिकरणम् ॥

अणुर्वा शून्यं वा भवतु परमं कारणमिति
प्रवृत्तं प्राक्पक्षं श्रुतिगवचनाभासबलतः ।
निराचष्टे कृष्णः नयमतिदिशन्नेव कथितं
तयोर्युक्त्या बाधं विपुलमविरोधे विशदयन् ॥ ७३ ॥
इत्थं समन्वयं सम्यक् श्रुतिमूर्धगिरां मुनिः ।
असाधयत्परेब्रह्मण्यद्वितीये शिवे दृढम् ॥ ७४ ॥
एतेन सर्वे व्याख्याता इत्यन्तैः सूत्रगुम्भनैः
योऽसाध्यात्मान्वयस्तस्याविरोधश्चिन्त्यते परम् ॥ ७५ ॥

इति श्री ब्रह्ममीमांसा त्रिशत्यां प्रथमाध्यायस्य
॥ चतुर्थः पादः ॥
॥ प्रथमाध्यायः समाप्तः ॥

॥ अथ द्वितीयोध्याये प्रथमः पादः ॥

स्वपक्षस्थापना प्रायः प्रथमाङ्घ्रौ वितन्यते ।
सांख्यादिस्मृतियुक्तीनां स्मृत्यन्तरविरोधतः ॥ ७६ ॥

॥ अथ स्मृत्यधिकरणम् ॥

सांख्यादिस्मृतयो भवन्ति वितथाश्चेज्जगत्कारणम्
मैवं मानव मुख्यवैदिकतमस्मृत्यादि वैयर्थ्यतः ।
वाक्यं कापिलगौरवं ब्रुवदपि श्रीवासुदेवं वद-
त्यन्या च श्रुतिरस्ति मानव वचो माहात्म्य विख्यापिका ७७

॥ अथ योगप्रत्युक्त्यधिकरणम् ॥

श्री पातञ्जल योगमुख्य वचनान्यव्याहतार्थानि तैः
वेदार्थस्य विरुद्धता यदि भवेत्त्याज्यो भवन्निर्णयः ।
वेदेऽपि क्वचिदाश्रितः खलु मनोरोधाख्य योगो यतः
न एतेनैव स दूष्यतां सममियाञ्जीवाननन्तान्वदन् ॥ ७८ ॥

॥ अथ न विलक्षणत्वाधिकरणम् ॥

ब्रह्मोपादानकं नो जगदतिमहतो भेदतोऽचिच्चितोश्चे-
त्याक्षिप्ते प्रब्रवीति स्फुटमिह बहुशो दृश्यते भिन्नयोस्तत् ।
सामञ्जस्यं न युक्तं प्रलयसमयतद्भावतश्चेति दोषः
त्वत्पक्षेष्वेव भूयो न तु निगमि मते तत्र दृष्टान्तभावात् ॥ ७९

सांख्यं योगं च युक्त्या रहितमिति भवान् दूषयामास नैवं
सूक्ष्माद्धेतोर्ब्रुवाणो महदुदयमसौ दूषणीयः कणादः ।
एतन्नैवं यतस्त्वं न सुजनविदितो नापि सद्युक्तिमात्थ
स्थूलात्तूलात्प्रजाते व्यभिचरति पटे न्यायकस्तावकश्च ८०

॥ अथ भोक्त्रापत्त्यधिकरणम् ॥

भोक्त्रापत्तिरुदेष्यति स्फुटमहो भोग्यस्य भोक्तुस्तदा
भोग्यत्वं भविता ततस्तद्यमतं दुष्टं भवेच्चेन्नहि ।
स्याल्लोकेष्विव वीचिबुद्बुदजलन्यायेन तुष्येद्भवान्
यावत्कल्मषनाशमेष्यति मनः तस्मात्परं ज्ञास्यति ॥ ८१ ॥

॥ अथ तदनन्यत्वाधिकरणम् ॥

मुख्यं सिद्धान्तमस्मिन् शृणु शुभधिषणैरुच्यमानं विवर्ते
कार्याणां ब्रह्मभेदो न भवति दृढमारम्भणादिश्रुतिभ्यः ।
युक्तेः शब्दान्तराच्चासदिति न गदितुं युक्तमस्यावरस्य
प्राक्सत्वस्यावबोधात् तदवगमगतेः तत्स्थितौचोपलब्धेः ८२

॥ अथ इतरव्यपदेशाधिकरणम् ॥

जीवस्य ब्रह्मभावोऽभिमत इति यदिस्यान्मतं सर्ववेत्ता
स्वस्यानिष्टं न कुर्यात् न खलु न कलयेत्स्वीयमिष्टं स्वतन्त्रः ।
नैतद्यस्माद्वयं तं सकलगुणयुतं ब्रूमहे नाल्पशक्तिं
जीवं पाषाणकादिष्विव तरतमतोपाधिभेदेन युक्ता ॥ ८३ ॥

॥ अथ उपसंहाराधिकरणम् ॥

लोके यत्कारणं तद्बहुविध सहकार्यन्वितं ब्रह्म तावत्
सर्वैर्हीनं कथं वा विरचयतु जगत् मा विशङ्कस्व चेत्थम् ।
देवक्षीरोर्णनाभा न बहिरुपकृताः कुर्वते चित्रसृष्टिं
ब्रह्माप्यव्यक्तयोगात्सृजति जगदिति ब्रूमहे तत्समाधिम् ८४

॥ अथ सर्वोपेताधिकरणम् ॥

लोके विग्रहवांस्तनोति विविधां मायां परब्रह्मणः
तद्धीनस्य न सा घटेत तदतो नाद्वैतवादः शुभः ।
नैवं शङ्कितुमर्हमत्र मतिमन् यस्मात्परा देवता
सर्वाभिः सहितास्ति शक्तिभिरिति स्पष्टं श्रुतौ दृश्यते ८५

॥ अथ कृत्स्नप्रसक्त्यधिकरणम् ॥

एकं ब्रह्म नकारणं भवति तत्कृत्स्नैकदेशत्वयोः
कोटयोर्ब्रह्मविलोपसावयवतापत्त्याख्यदोषद्वयात् ।
नैवं शास्त्युभयं हि शास्त्रमपि च स्वप्ने समस्तं जगत्
जीवे कल्प्यत एव दोषरहिता कोटिर्विवर्ताश्रया ॥ ८६ ॥

॥ अथ न प्रयोजनवत्त्वाधिकरणम् ॥

सृष्टिश्चेतनकर्तृका हि सफला दृष्टा परं ब्रह्म च
प्राप्तेहं न च मत्ततुल्यमिति नाशङ्क्योत्र बाधो यतः ।
लीलाकेवलमीश्वरादिवदपि श्वासादिवद्युज्यते
सर्वेशस्य जगत्प्रवृत्तिरचना चेयत्करीति स्फुटम् ॥ ८७ ॥

॥ अथ वैषम्य नैर्घृण्याधिकरणम् ॥

वैषम्यं निर्घृणत्वं विषममिह जगत्तन्वतो ब्रह्मणः स्यात्
तस्मादद्वैतवादो न सुरस इति चेन्नैव सापेक्षतायाः ।
कर्मापेक्षो हि सृष्टिं रचयति विषमां न स्वतन्त्रस्तथा हि
श्रुत्यन्ता एष एवेत्यसकृदभिदधत्यस्य धर्माद्यपेक्षाम् ॥ ८८

नादौ कर्मास्ति यस्मादिदमुपशमयेः दोषमीशे प्रसक्तं
नैवं यस्मादनादिः सुकृतदुरितरूपादिलोकस्तथैव ।
छान्दोग्ये जीवशब्दाभिलपन वशतः सूच्यतेऽनादिताऽस्य
किंच श्रुत्यन्तरैः सा प्रतिहतिरहिता सूपपन्ना च युक्त्या ॥

॥ अथ सर्वधर्मोपपत्त्यधिकरणम् ॥

न निर्गुणमुपादानमतोऽयुक्तः समन्वयः ।
इति चेन्न विवर्ते हि सगुणत्वमनीप्सितम् ॥ ९० ॥

॥ इति ब्रह्ममीमांसाविंशत्यां द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ अथ द्वितीयः पादः ॥

॥ अथ रचनानुपपत्त्यधिकरणम् ॥

सांख्यैर्यत्किल साधितं बहुविधैर्न्यायप्रयोगैस्तद-
स्त्यव्यक्तं प्रकृतिस्तदेव जगतो न ब्रह्मवादः शुभः ।
आक्षेपं तमदूदुषत्खलु मुनिः सूत्रैरनेकैर्जडे-
ऽसम्भाव्याखलु चित्रलोकरचना प्रज्ञावदेकाश्रया ॥ ९१ ॥

सुखदुःखमोहधर्मा नार्थगता आन्तरा यतस्ते हि ।
स्त्रीपिण्ड एक एव त्रेधा भाति श्वकान्तमस्करिणाम् ॥ ९२ ॥

अन्ये च सिद्धसाधनदूषणभाजो भवन्ति मायातः ।
प्रमितत्वं व्यभिचरति हि सत्वरजस्तम उदञ्चितेऽव्यक्ते ॥ ९३

प्रवृत्तिश्चाशक्या धटयितुमहो चेतनमृते
जडे रथ्याक्रांते खलु रथमुखे सा प्रथितिभाक् ।
नचाशङ्क्या साक्षान्नभवति स आत्माश्रय इति
प्रसिद्धोऽयं ह्यात्मा निखिलजगतामप्यहमिति ॥ ९४ ॥

अचेतनं चेतनमन्तरा न स्वतः प्रवृत्त्यर्हमितीदमात्थ ।
पयोऽम्बुनोस्तद्व्यभिचारि ते हि स्वतः प्रवृत्ते जगदर्भकार्थे ॥ ९५

इत्याशङ्का न कार्या यत उभयमपि स्थापितं पक्षकुक्षौ
तत्रापीशाद्यपेक्षां ननु वयमधुना स्थापयामः स्फुटं च ।
क्षीरं वत्साद्यपेक्षं जलमपि सुतरां निम्नभूम्याद्यपेक्षं
तस्मान्मास्मात्र शङ्कां कुरु कुशलमते सन्मनःक्षोभदात्रीम् ॥

तृणं यद्वत् क्षीरीभवति निरपेक्षं जडमपी-
त्ययं वादो युक्तो न च कलयितुं सांख्यतनयैः ।
यतोऽन्यत्राभावादिति हि रचयन् सूत्रमृषिराट्
गवाद्यैर्भुक्तत्वं वदति तदपेक्षं च तदिति ॥ ९७ ॥

अङ्गीकुर्मः प्रौढ्या तथापि नार्थोऽस्ति तत्प्रवृत्तेर्हि ।
पुरुषस्य भोगमोक्षौ यदि तौ स्यातां हि सन्ततप्रसरौ ॥ ९८ ॥

अङ्गाङ्गित्वमथच्युतिश्च न भवेत्साम्याद्गुणानां मिथः
यस्मात्सत्वरजस्तमांसि न चलान्यन्याङ्गताभाञ्जि न ।
किञ्चैवं न समञ्जसं भवति ते शास्त्रं यतो ऽन्योन्यतः
भूयो विप्रतिषेधभञ्जि गणितान्यात्मादि तत्त्वान्यपि ॥ ९९ ॥

॥ महद्दीर्घाधिकरणम् ॥

प्रसङ्गादात्मीयं मतमिह सुबद्धं प्रकुरुते
न नैयत्यं न्यूनादधिकपरिमाणोदय इति ।
यतोऽणोःस्यात् दीर्घं भवति परमाणोर्द्व्यणुकम-
प्यतो युक्तं ब्रह्मप्रभवमिदमभ्रादिभुवनम् ॥ १०० ॥

॥ परमाणुजगदकारणत्वाधिकरणम् ॥

सांख्येनिषिद्धे पुनरीशवादी नैयायिकश्चोदयितुं प्रवृत्तः ।
अणुभ्य एवोदयमीशमत्या मन्यामहे तज्जगतो न दोषः ॥ १०१
नैतद्युक्तं यतोणुष्वनुमतमथवा कर्म जीवे द्विधापि
प्राप्तिर्नो कर्मणां स्यादितिखलु सुवचो नाणुहेतुत्ववादः ।
शिष्टैर्दूरीकृतत्वादपि च तवमतं श्रेयसे नादरार्हं
प्रायो वैनाशिकस्यानुगमति चपलं मन्दतर्कैरुपेतम् ॥ १०२ ॥
समवायाङ्गीकारादपि च मतं तावकं प्रदूष्येत ।
संयोगेन समत्वादनवस्थानाच्च तद्योगे ॥ १०३
रूपादिमत्त्वाच्च विपर्ययो भवेदणुत्वनित्यत्वकयोर्भवन्मते ।
यद्रूपवत्तद्धि सकारणं भवेत्स्थूलं तथा कारणतश्च कार्यम् ॥ १०४

॥ अथ तृतीयः पादः ॥

॥ अथ वियदधिकरणम् ॥

न वियदश्रवणाज्जनिमद्भवेत्
उत भवेज्जनिमद्वचनान्तरात् ।
इति मिथः कलहे निगमः कथं
भजति साधु समन्वयमात्मनि ॥ ११६ ॥

अतो गौण्युत्पत्ति श्रुतिरिति वदन्तं प्रतिजगौ
प्रतिज्ञास्याद्भग्ना ननु सकलविज्ञादिविषया ।
विभक्तं यत्सर्वं विकृतिमदिति ज्ञेयमथ च
श्रुतौ कस्याश्चिद्वा नच निरसनं जन्मन इति ॥ ११७ ॥

अतोऽविरुद्धा खोत्पत्तिरूपसंह्रियतेऽन्यतः ।
अन्यत्र सर्ववेदान्त प्रत्ययन्यायवैभवात् ॥ ११८ ॥

॥ अथ मातरिश्वाधिकरणम् ॥

एतेन मातरिश्वा व्याख्यातश्चादिमानिति व्यक्तम् ।
तदमृततापरवचसामापेक्षिकता यतः साध्वी ॥ ११९ ॥

॥ अथ असंभवाधिकरणम् ॥

सकारणं कारणं चेत्तस्याप्यन्यत्तदिष्यताम् ।
नासम्भवः सतोऽन्यस्य हेतुत्वानुपपत्तितः ॥ १२० ॥

॥ अथ तेजोधिकरणम् ॥

अग्निर्वायोः प्रजातो भवति किमथवा ब्रह्मणस्त्वेव साक्षात्
इत्थं संशय्य ताण्डिश्रुतितदितरयोर्वाक्ययोर्वैरिभावात् ।
अप्रामाण्ये जगाद क्रमपरवच इत्येकदेशी प्रधानं
सिद्धान्तं प्राह सिद्धान्त्यनिलतनुमतो ब्रह्मणो जातमग्निम्

॥ अथ अबधिकरणम् ॥

अन्तरयाम्यप इति खल्वसूत्रयद्भूमितेजसोर्मध्ये ।
अप्तेजसोरपञ्चीकृतयोः कलहो न तास्ततोजाताः ॥ १२२ ॥

॥ अथ पृथिव्यधिकरणम् ॥

छान्दोग्येऽन्नं तित्तिरिवाक्ये पृथ्वी च विश्रुते जलजे ।
इति वैरेऽप्रामाण्यं पृथ्व्यधिकारेति सूत्रकृन्नुदते ॥ १२३ ॥
पृथ्व्येव प्रकृता सितेतरमधाद्रूपञ्च शब्दान्तरं
काण्वानां प्रथितश्च पृथ्व्यभवदित्येतैस्त्रिभिर्हेतुभिः ।
अन्नं भूमिरिति स्म ताण्डिवचनेप्यस्थापयत्तापसः
वर्षाद्वृद्धिवचश्च तत्र सुतरामाञ्जस्यमञ्चेद्यतः ॥ १२४ ॥

॥ अथ तदभिध्यानाधिकरणम् ॥

भूताधिष्ठातृ देवाः स्वयमिह रचयन्त्येव तत्तद्विभूतं
ब्रह्माभिध्यानतो वेत्यविनिगमवशात्संशये देवतानाम् ।
चैतन्यादेव नात्मेक्षणमिह वदितुं युक्तमित्येकदेशि-
न्याहाभिध्यानतस्तत्तदवगमकसल्लिङ्गसद्भावहेतोः ॥ १२५

॥ अथ विपर्ययाधिकरणम् ॥

सृष्टौ यः क्रम ईरितः सहि भवेन्नाशे क्रमोऽत्रान्यथा
नाशेऽपि क्रम एष एव न ततो भिन्नः श्रुतौ श्रूयते ।
नैवं सृष्टिविपर्ययेण विलये ज्ञेयः क्रमो युक्तिमान्
सोपानाद्यवरोहणक्रमनिभं जानीहि तं बुद्धिमन् ॥ १२६ ॥

॥ अथ अन्तराविज्ञानाधिकरणम् ॥

विज्ञानमनसोर्भूतसृष्टेः प्राक्सृष्टिवर्णने ।
श्रौतक्रम विरोधः स्यादिति चेन्नान्तरा हि ते ॥ १२७ ॥

॥ अथ चराचरव्यपाश्रयाधिकरणम् ॥

जीवस्योत्पत्तिवादिश्रुतितदितरयोर्वैरभावे गुणत्वं
देहाद्यालम्ब्य जीवे जनिमृतिवचसां मुख्यता नास्ति तेषाम् ।
इत्थं यत्स्थास्नुचारिद्वयमिदमवलम्ब्यास्य जन्मादिमत्वं
युक्तं तद्भाव भावादिति निगमगिरां निर्णयं प्राह कृष्णः ॥

॥ अथ आत्माधिकरणम् ॥

नात्मा स्वेन गुणेन जन्ममृतिमान् वेदेऽश्रुतेस्तद्वयोः
भूयोभ्यश्च वचोभ्य एषनियतं नित्यो हि निश्चीयते ।
तस्माज्जीवचिदेव नित्यमहितब्रह्मेति वेदान्तिनां
सिद्धान्तः फलितस्तमेतमबुधा नो जानते दुष्कृतात् ॥ १२९

॥ अथ ज्ञाधिकरणम् ॥

ज्ञोऽतएव हेतुतश्च जीव इत्यूरीकुरु
स्वप्रकाशचित्स्वरूपतां श्रुतिर्जगौ यतः ।
गौतमादिवत्तु जन्यवृत्तिमत्ववर्णने
धर्मवैकृताद्धवेद्धि धर्मिणो विकारिता ॥ १३० ॥

॥ अथ तद्गुणसारत्वाधिकरणम् ॥

उत्क्रान्ति गत्यागतिमुख्यतानुरोधेन जीवोऽणुरिति प्रसक्तम् ।
आक्षेपमालोड्य निराचकार सूत्रैरनेकैरथ सूत्रकारः ॥ १३१ ॥

सर्वाङ्गीण सुखोपलब्धिरहता सर्वस्यसिद्धा सखे
सा नो चन्दनवद्धृदेकनिलयस्याहा निरंशस्य हि ।
तस्मात्तद्गुणसार एष तु धिया तुल्यः परिच्छिद्यते
व्यापी सन्नपि लोहितस्फटिकवत्स्वाध्यस्त तद्धर्मकः ॥ १३२

॥ अथ कर्त्रधिकरणम् ॥

बुद्धावेव कृतिर्न जीव इति चेत् दद्याद्यजेत्यादिकं
श्रौतं वाक्यमनर्थकं भवति तत्कर्तृत्वमङ्गीकुरु ।
मुख्यं तद्यदि नूनमस्य विलयाभावादमोक्षस्ततो
ऽनिर्वाच्यं तदिति प्रसाधनपरं न्यायद्वयं चिन्त्यते ॥ १३३ ॥

कर्ता शास्त्रार्थवत्त्वाद्यदि स न भविता चेतनाहीनबुद्धेः
कर्तृत्वासंभवेन प्रकुपितममलं वैदिकं वाक्यजातम् ।

तस्याश्चिच्छक्तियोगे करणकृतिमतोर्नाममात्रे विवादः
इत्यादीन् सूत्रकारः प्रथमनय उदाहृत्य कर्तृत्वमूचे ॥ १३४

॥ अथ तक्षाधिकरणम् ॥

यद्वत्तक्षोभयात्मा भवति सकरणः कर्तृताभाक् स पश्चात्
मुक्त्वा सर्वं स्वकीयं करणमपि भवेन्निष्क्रियोऽकारकश्च ।
तद्वज्जीवो धिया सङ्गत उपलभते कर्तृतां तद्वियोगे
निष्कर्तृत्वो विशुद्धो भवति सुखमयो नास्त्यनौचित्यमत्र ॥

॥ अथ पराधिकरणम् ॥

परात्तुतच्छ्रुतेरिति स्वतन्त्रतां पराणुदन्
प्रभोरधीनमाह जीवकर्तृभोक्तृतादिकम् ।
यमेष उन्निनीषतीति वाक्यबोधयत्यतो
विरोधशान्तिरस्ति जीवदेव कर्तृतागिरोः ॥ १३६ ॥

॥ अथ अंशाधिकरणम् ॥

जीवस्यांशत्ववाचामपि च तदभिदाबोधिवाचां विरोधे
प्रामाण्यं भज्यते हि श्रुतिशिखरगिरामद्वितीयात्मतत्त्वे ।
एवं सत्येकदेशी परिजगृह इमं मुख्यमेवात्र भेदं
सिद्धान्ती तं निरस्यन् अवददिवपदं योजयन् कल्पितत्वम् ॥
नानात्वव्यपदेशतः श्रुतिगणैर्दाशादिभावस्य च
व्यक्तं कैश्चिदपि स्फुटं प्रकथना दंशो यथांशो हि सः ।

जीवो ब्रह्म भवेदुपाधिवशतो भेदं गतो देहिनोः
साङ्कर्यं सुखदुःखयो र्नच भवेत्स्वस्थोऽद्वयात्मान्वयः ॥ १३८
नानात्वेपि च देहिनां विभुतया प्राप्तो हि दोषस्त्वया
नोशक्यः परिहर्तुमस्त्यनियमोऽदृष्टाभिसन्ध्यादिषु ।
अन्तर्भावमियात्प्रदेशकलनाप्यन्योन्यसौख्यं यतः
जीवानां भविता मिथस्तदमलं ब्रह्मात्मवादं भज ॥ १३९ ॥

इति श्रीब्रह्ममीमांसा त्रिशत्यां द्वितीयाध्यायस्य
॥ तृतीयः पादः समाप्तः ॥

॥ अथ चतुर्थः पादः ॥

॥ अथ प्राणाधिकरणम् ॥

भौतिकसृष्टिपराणां वाक्यानां वैरशोधनं प्रायः ।
क्रियते तुरीयपादे पाराशर्येणसूत्रनिकुरुम्बैः ॥ १४० ॥
प्राणा उत्पत्तिमन्तः किमु जनिरहिताः संशयेऽस्मिन् श्रुतीनां
अद्वैते योऽन्वयः प्राक् भगवदभिमतस्तस्य जायेतभङ्गः ।
एवंसत्येकदेशी वदति खलु पुरा नित्यतां मुख्यतः स्वं
सिद्धान्तं सूत्रकारः कथयति हि तथा प्राणका जन्मवन्तः ॥
गौण्या असम्भवादिति पदैकता चात्र वेदितव्या स्यात् ।
सिद्धान्तसूत्रगत्वादन्यत्सर्वं समानमितरेण ॥ १४२ ॥

॥ अथ सप्तगत्यधिकरणम् ॥

ते प्राणाः कति वा भवन्ति निगमाः भेदेन सप्ताष्टता-
मुख्यामाहुरहो त्रयोदशकतापर्यन्तसंख्यामिति ।
नैवं सप्त गतेर्विशेषिततया चेत्येकदेशीरिते
हस्ताद्या अपरे च कार्यवशतस्त्वेकादशेति स्थितम् ॥ १४३

॥ अथ प्राणाणुत्वाधिकरणम् ॥

ते प्राणाः अणवः किं महान्त आहो भवेयुरिति विशये ।
सूक्ष्मत्वमाह सूत्रे सांख्योक्तां दूषयंस्तु तद्विभुताम् ॥ १४४ ॥

॥ अथ ज्येष्ठाधिकरणम् ॥

मुख्यः प्राणस्त्वनादिर्न खलु स जनिमान् नासदासीयसूक्ते
आनीदित्युक्तिसत्वात् इति पुनरधिकाशङ्कया संप्रवृत्तम् ।
पक्षं प्रत्याकरिष्यन् अतिदिशति जनिं सूत्रकारो महर्षिः
श्रेष्ठश्चेत्युक्तपूर्वं सकलमपि नयं संजिघृक्षुः स्म सूत्रे ॥ १४५

॥ अथ मुख्याणुत्वाधिकरणम् ॥

मुख्योऽप्यणुरिति पुनरप्यतिदिशति प्राणसूक्ष्मतां सूत्रे ।
व्यापित्वशङ्कयोत्थं पक्षं सांख्यीयमिह निराकर्तुम् ॥ १४६ ॥

॥ अथ नवायुक्रियाधिकरणम् ॥

सामान्याकरणानां वृत्तिः प्राणो भवेदथो वायुः ।
नैतत् द्वयमपि पृथगुपदेशादित्याह तत् द्वयात्तस्य ॥ १४७ ॥

॥ अथ ज्योतिराद्यधिकरणम् ॥

ते प्राणाः स्वमहिम्नैव कार्यं कुर्वन्त्युतान्यथा ।
शक्तत्वात् स्वमहिम्नैव कार्यं कुर्युरिति स्थिते ॥ १४८ ॥
अग्न्याद्यधिष्ठिता एव वागाद्याः कार्यकारिणः ।
तदामननतस्तेषां भोक्तृत्वं न प्रसज्यते ॥ १४९ ॥

॥ अथ त इन्द्रियाधिकरणम् ॥

सर्वे प्राणाः वृत्तिभेदा भवेयुर्मुख्यस्याहो भेदभाजः स्वतः स्युः ।
एवं जाते संशये श्रेष्ठतोऽन्ये तत्त्वस्पष्टं शिष्टमित्याह भेदम् ॥ १५०
सूत्रत्रयेणापि पुनश्च भेदं प्रसाधयत्यत्र हि सूत्रकारः ।
न चैतदन्ये पुनरङ्ग्यकार्षुः वाचस्पतिप्रोदितयुक्तिजालैः ॥ १५१

॥ अथ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥

संज्ञामूर्त्योर्व्याकृतिर्जीवसाध्या किं वा सर्वाधीशसाध्येति चैवम् ।
सन्देहे सत्याह जीवैकसाध्यां ताण्डिश्रुत्यां तत्परामर्शसत्वात् ॥
इत्याक्षेपे कथयतिमुनिस्तां त्रिवृत्कर्तृसाध्यां
ल्यप्चाप्येतां द्रढयतिसमां कर्तृतां विष्टिकृत्योः ।
पञ्चीकारेऽप्यवनिरियमापस्त्वमूस्तेज एतत्
वायुः खं वेत्युचितमुभयीयोगवैशेष्यवत्त्वात् ॥ १५२ ॥

इति श्री ब्रह्मसूत्रत्रिशत्यां द्वितीयाध्यायस्य
॥ चतुर्थः पादः समाप्तः ॥
॥ अध्यायश्च समाप्तः ॥

॥ अथ तृतीयाध्याये प्रथमः पादः ॥

॥ अथ तदन्तरप्रतिपत्त्यधिकरणम् ॥

देहान्तरं प्रतिपतन्ननु भूतसूक्ष्मैः
संवेष्टितः किमुत रंहति केवलो वा ।
सर्वत्र भूतविततेः सुलभत्वहेतोः
नो भूतवेष्टनमिह प्रतिपादनीयम् ॥ १५४ ॥

इत्युत्थितं प्रतिवदत्यथ सूत्रकारः
संवेष्टितो व्रजति देह्यपरं हि लोकम् ।
प्रश्नं निरूपणमपि प्रतिपश्य विद्वन्
पञ्चाग्निदर्शनगतं मुनिपुत्रराज्ञोः ॥ १५५ ॥

पञ्चम्यामाहुतौ ताः पुरुषवचनतां भेजिरे तत्कथं वे-
त्याह क्षत्रात्मजातो मुनिवरजनुषा पृष्ट एवं भवेयुः ।
आपः पञ्चीकृता इत्यवनिजलमुखैः संयुतस्त्वेषभूतैः
प्रेयाद्देहान्तरं तज्जनिमृतिकलनात्साधनीया विरक्तिः ॥ १५६ ॥

॥ अथ कृतात्ययाधिकरणम् ॥

भुक्त्वा पुण्यं स्वर्गलोकेऽथ भूमी-
मागच्छन्तः सावशेषा अथो न ।
इत्थं वीक्ष्याथैकजन्माभिधायि-
न्याचक्षाणे भुक्तशेषापलापम् ॥ १५७ ॥

व्यासः प्राह कृतात्ययेनुशयवान् जीवोवरोहेद्यतः
दृष्टं च स्मृतिरेवमाह न पुनारोहक्रमोऽत्रान्वयी ।
किन्त्वेवं च न चैवमित्यतिशयः शीलाद्भवापत्तिवाक्
कर्माकर्मपरेति बादरिमुनिः प्राहस्म तत्त्वार्थदृक् ॥ १५८ ॥

॥ अथ अनिष्टादिकार्यधिकरणम् ॥

ये ऽनिष्टादिकृतः प्रयान्ति तइमे लोकान्तरं किं न वे-
तीक्षायां वदति स्म पूर्ववचनं तत्सर्वनामश्रुतेः ।
नैवं ते यमलोकमेत्य बहुधा भुक्त्वा चिरं यातनाः
कीटादि प्रतिपत्तिभाज इति च प्रोचुः पुराणादयः ॥ १५९

॥ अथ नातिचिराधिकरणम् ॥

ते प्राग्व्रीह्यादिभावात्किमति चिरमिहाकाशवाय्वादिभावं
प्राप्ता आहोद्रुतं वेत्यविनिगमवशादागतं पूर्वपक्षम् ।
प्रत्याचख्यौ मुनीन्द्रो दुरतिगतरता यत्परस्ताद्विशिष्टा
नात्यर्थं ते चिरेणाम्बरमुखसमतां प्राप्नुयुः प्राग्यवादेः ॥ १६०

॥ अथ साभाव्यापत्त्यधिकरणम् ॥

ते किं तत्तन्मयत्वं वियदनिलमुखैः प्राप्नुयुर्वोत तत्तत्-
संश्लेषं वेति जाते सति दृढविशये प्राप्तमेषामभेदम् ।
साभाव्यापत्तिसूत्रात् परिहरतिमुनिः सोपपन्ना च यस्मात्
आकाशाद्यैरभेदो न भवति खलु तत्कर्मजन्यं स्वजन्म १६१

॥ अथ अन्याधिष्ठिताधिकरणम् ॥

व्रीह्यादिष्वपि संशयो भवति ते किं श्लेषिणस्तन्मया
वेत्येवं सति यागहिंसनवशाद्युक्ता भवेत्कर्मिणाम् ।
व्रीह्यादिप्रतिपत्तिरित्यभिमतं पक्षं निराचष्ट
तेष्वन्याधिष्ठितकेषु पूर्ववदिहाप्याश्लेषणं शब्दतः ॥ १६२ ॥

जीवारोहावरोहादिविचारेण विरागिताम् ।
उत्पादयितुमारेभे पादस्तार्तीयकादिमः ॥ १६३ ॥

॥ इति श्री ब्रह्ममीमांसा त्रिशत्यां तृतीयाध्याये ॥
॥ प्रथमः पादः समाप्तः ॥

॥ अथ द्वितीयः पादः ॥

॥ अथ सन्ध्याधिकरणम् ॥

विरक्तिं प्रथमेपादे जनयित्वा द्वितीयके ।
शोध्येते त्वंतदर्थौ हि तदवस्थाविवेचनात् ॥ १६४ ॥

सन्ध्ये सृष्टिः सत्यभूता यतस्तत्-
निर्मातारं प्राज्ञमेके वदन्ति ।
इत्याक्षेपे प्राह कृष्णोमुनीन्द्रः
मायैवैषा कृत्स्नसम्पत्त्यभावात् ॥ १६५ ॥

कालो देशो निमित्तं न भवति सुवचं स्वप्नदृष्टे पदार्थे
भूयो दृष्टो विवादः तदनृतमिति भो निश्चिनु स्वप्नदृष्टम् ।

श्रुत्या तत्सूचकत्वं परमनुगदितं तद्विदश्चापि तत्त्वं
सम्यग्व्याचक्षते तत्सकलमपि जगत्स्वाप्निकं कल्पितञ्च ॥

॥ तदभावाधिकरणम् ॥

स्वप्नाद्विवेचितो जीवः सुषुप्ताच्च विवेचनम् ।
कर्तुमारभते सूत्रं तदभाव इति व्रती ॥ १६७ ॥
तदभावः प्राज्ञे वा नाडीष्वथवा पुरीततीतिमतिम् ।
प्रत्याह तत्समुच्चयवचनान्नद्या समुद्रगामिनयात् ॥ १६८ ॥

॥ अथ मुग्धाधिकरणम् ॥

मुग्धः किन्नु भवेद्विलक्षण उतावस्थात्रयान्तर्गतः
स्यादर्धं मरणे भवेच्च पुनरप्यर्धं सुषुप्ताविति ।
पक्षं दूषयतिस्म सूत्रकृदमुं भिन्नं वदन् पञ्चमं
वैद्यादिप्रथितं सुयुक्तिभरितं लोकोक्तितः साधयन् ॥ १६९

॥ अथ उभयलिङ्गाधिकरणम् ॥

न स्थानतोऽपि हि परं भवतिद्विलिङ्गं
सर्वत्र वेदशिखरेषु तदप्रसिद्धेः ।
नीरूपबोधकवचः प्रबलं भवेद्यत्
तत्तत्प्रधानमितरत्तु तदप्रधानम् ॥ १७० ॥
अत्रैकेऽधिकृतिद्वयं विरचयन्त्याचार्यपादास्तुतान्
प्रत्यूचुः विफलं भवेत्खलु तदा न्यायान्तरं सर्वथा ।
सद्बोधात्मकता च पूर्वनयतः सिद्धा नियोगोपि च
ब्रह्मज्ञस्य न संभवेत्प्रविलयः पार्थक्यतो नेष्यते ॥ १७१ ॥

॥ अथ प्रकृतैतावत्त्वाधिकरणम् ॥

मूर्तामूर्तं च रूपं भवति च खलु यद्रूपिसर्वं निषेध-
त्याहो रूपं निषेधन् अथ च परिशिनष्टीतरन्नेति नेति ।
इत्थं सन्दिह्य सर्वं तदपवदति तद्वाक्यमित्याक्षिपन्तं
प्राहाचार्यः प्रवृत्तं यदुत मितमिदं नेति तस्यैवबाधम् ॥ १७२

अतोन्यत्परमस्तीति भूय आदेशनादपि ।
सत्यं सिध्द्वयत्यधिष्ठानं सर्वबाधावधिःस्वयम् ॥ १७३ ॥

॥ अथ पराधिकरणम् ॥

सेतून्मानकसङ्गभेदनिगदा भेदं वदन्तः स्थिताः
तद्ब्रह्मान्यदिहापिगम्यमिति चेन्नैकत्वसंवित्क्षतेः ।
सामान्यादपि सेतुशब्दघटना मानन्तु धीसिद्धये ।
सम्बन्धश्च विभेदनश्च मनसोऽध्यासादतो ब्रह्मता ॥ १७४ ॥

॥ अथ फलाधिकरणम् ॥

किं ब्रह्मणः फलमुत स्वकृतादपूर्वसंज्ञादिति
स्म विशये स जगाद धर्मात् ।
आचार्यजैमिनिरथेश्वरतस्तु वेद-
व्यासस्तथासति सुखादिफलोपपत्तेः ॥ १७५ ॥

त्वन्तत्पदार्थयोः शुद्धिः पादेनानेन चिन्तिता ।
गुणोपसंहृतिः पादे तृतीये चिन्तयिष्यते ॥ १७६ ॥

इति श्री ब्रह्ममीमांसा त्रिशत्यां तृतीयाध्यायस्य
॥ द्वितीयः पादः समाप्तः ॥

॥ अथ तृतीयः पादः ॥

॥ अथ सर्ववेदान्तप्रत्ययाधिकरणम् ॥

श्रूयन्ते दहरादिकाश्च विविधाः विद्याः श्रूतीनां शिरः-
स्वेता भेदमयन्ति वेदभिदया नो वेति कोटिद्वये ।
यः शब्दान्तर संज्ञकः प्रथमके तन्त्रे नयस्तद्बला-
द्भिन्ना एव भवेयुरित्यचरमः पक्षः समभ्यापतत् ॥ १७७ ॥

तं प्रत्याह मुनिः पराशरसुतः सर्वैश्च वेदान्तरैः
विद्या या विहिता समानविषया सैकाऽविशेषदिति ।
स्वाध्यायस्य तु धर्म एष यदुतास्त्येकाग्निकाण्डे शिर-
स्यङ्गारस्य विधारणं न स भिदामुत्पादयेद्विद्ययोः ॥ १७८ ॥

॥ अथ उपसंहाराधिकरणम् ॥

विद्यानामेकतामुक्त्वा तस्याः फलमस्तवयत् ।
उपसंहृतिमन्योन्यं धर्माणाममुकेनये ॥ १७९ ॥

॥ अथ अन्यथात्वाधिकरणम् ॥

काण्वानामपि ताण्डिनामभिमता योद्गीथविद्या समा
सा किं नेति विचार्य साम्यमभिधायाख्यान तौल्यात्पुरा ।
उद्गायेति च कर्तृता क्वचिदतस्त्वन्यत्र तत्कर्मता
तस्माद्भेदमसाधयत्खलु तयोर्भेदप्रमाणैर्दृढैः ॥ १८० ॥

॥ अथ व्याप्त्यधिकरणम् ॥

उद्गीथमक्षरमिति स्म विभक्तितौल्यं
ह्यध्यासबाधतदभेदविशेषणेषु ।
पक्षेषु किं विषयकं भवतीति चर्चां
प्रासङ्गिकीं कलयति स्म महर्षिवर्यः ॥ १८१ ॥

सर्वव्यापी न खलु भजति ग्राह्यतामत्रतस्मात्
उद्गीथस्यावयव इति तं स्वेतरेभ्यो विशिंषन् ।
ब्रूते वेदः प्रणवमिह सूपास्यमुद्गीथ भक्ते-
रङ्गं व्यासोऽप्यवददथ तद्व्याव्याप्तितश्चाञ्जसत्वम् ॥ १८२ ॥

॥ अथ आनन्दाद्याधिकरणम् ॥

आनन्दादिगुणाः किमत्र बहुधा वेदान्तरेषु श्रुताः
अन्योन्योपहृतिं भजेयुरथवा नेत्येवमाशङ्किते ।
एकेनापि मतेर्गतिर्भवति चेद्धर्मान्तरैः किं वृथे-
त्याक्षेपे सति निर्णिनाय मुनिरानन्दादिमान्मुख्यगान् १८३

सत्यसङ्कल्पतादीनां भवेदनुपसंहृतिः ।
नत्वानन्दादिधर्माणां वृद्धिह्रासाद्यभावतः ॥ १८४ ॥

॥ अथ सर्वाभेदाधिकरणम् ॥

आम्नाता हि वसिष्ठताप्रभृतयः काण्वैस्तथा ताण्डिभिः
ते हार्याश्च कुषीतकीयवचने नोवेति कोटिद्वये ।
एवंकारपदेन नो हतिरिति प्राप्ते च पूर्वमते
सर्वाभेदवशाद्विनिर्णयति संहारं मुनिर्विद्ययोः ॥ १८५ ॥

॥ अथ आध्यानाधिकरणम् ॥

योयं काठकवाक्यगः पुमवधिः श्रौतः परत्वक्रमः
तत्तस्मात्सपरः परस्त्विति हृषीकादिः स किं तत्परः ।
नो वेति प्रथमं विमृश्य सकलैदम्पर्यं आशङ्किते
आध्यानाय न च प्रयोजनमिति प्राहात्मपारम्यकम् ॥ १८६

॥ अथ आत्मगृहीत्यधिकरणम् ॥

आत्मा वा इति किं गृहीतुमुचितं सूत्रं परंब्रह्म वा
भूतासर्जन लोकसर्जनवशात् सूत्रग्रहे शङ्किते ।
सर्वज्ञःखलु तैत्तरीयवदिहाप्यात्मा गृहीतव्य इ-
त्याहाद्ये मुनिरुत्तरादिति वदन् हेतुं शुभे वर्णके ॥ १८७ ॥

अन्यंवर्णकमप्यथास्य रचयन्त्याचार्यपादा इह
छान्दोग्येऽपि च काण्ववाक्यसदृशोऽस्त्यात्मग्रहस्तूत्तरात् ।
तत्सत्यं स इति स्म ताण्डिवचनेप्यात्मैक्यमावेद्यते
काण्वानां वचसीव सत्त्ववचनेप्यात्मग्रहश्चेष्यते ॥ १८८ ॥

॥ अथ कार्याख्यानाधिकरणम् ॥

कार्याख्यानादपूर्वं कथयति मुनिराट् वाससोध्यानमत्र
प्राप्ताद्याचान्तिरन्यस्मृतिवचनवशात् तामनूद्यैतदीये ।
तोयेऽनग्नत्वसिद्ध्यै श्रुतिरपि विदधात्यंशुकध्यानमत्र
प्राप्ताप्राप्तत्वनीत्याऽचमनमधिगतं तद्विधानं न युक्तम् १८९

॥ अथ गतेरर्थवत्त्वाधिकरणम् ॥

ये दुष्कृतं सुकृतमप्यवधूनयन्ति
सर्वेऽपि ते गतिमयन्त्युत केचिदेव ।
प्रेक्ष्यैवमाह कतिचिद्गतिमीयुरन्ये
नो यान्ति निर्गुणविदोऽत्र परं प्रपन्नाः ॥ १९९ ॥

॥ अथ अनियमाधिकरणम् ॥

अर्चिरादिका गतिर्यास्ति वेदमस्तके
सा क्वचिन्नियम्यते वा समत्र सम्मता ।
प्रेक्ष्य चैवमब्रवीत्तासु नित्यतां मुनिः
यत्तदभ्युपायने नो विरुद्धता क्वचित् ॥ २०० ॥

॥ अथ आधिकारिकाधिकरणम् ॥

विद्याफलं भवति पाक्षिकमेव नो वा
मुक्तिः फलं भवितुमर्हति वेदनस्य ।
यस्माद्वसिष्ठमुखराः विदितात्मभावाः
भूयोऽलभन्त जनिमित्युदिते ब्रवीति ॥ ॥ २०१ ॥

ये ह्याधिकारिक पुमांस इति प्रसिद्धाः
तेषां स्वदेहविलये हि विदेहमुक्तिः ।
तद्भूरिजन्मभिरपि प्रभवेदुतस्यात्
एकेन वा भरतयोगिमुखेषु दृष्टम् ॥ २०२ ॥

॥ अथ अक्षरध्यधिकरणम् ॥

अस्थूलत्वादि धर्माः किमिह ननु मिथोऽप्याहियन्तां न वेति
प्राप्ते भूयो विचारे प्रवदति चरमं पक्षमत्र व्रतीन्द्रः ।
सामान्यात्तत्स्थितेश्चौपसदवदिह शाखान्तराद्धर्मजात-
ग्राहो नो दुष्यतीति प्रथितमिदमहो जैमिनीयेऽपि सूत्रे ॥

॥ अथ इयदधिकरणम् ॥

यत्त्वाथर्वणवाच्यवादिसयुजोरेकोऽशिता नान्य इ-
त्याम्नातं च कठैरुभौ च पिबतः स्वादु क्रियाणां फलम् ।
भिद्येते खलु ते मती इति बलादाक्षिप्य सिद्धान्तितं
विद्यैकत्वमियत्ववर्णनकथा तुल्या यतश्चोभयोः ॥ २०४ ॥

॥ अथ अन्तराधिकरणम् ॥

यत्साक्षादपरोक्ष इत्यभिदधे द्विर्ब्रह्मवाक्ये मुनिः
ते किं भिन्नमती उतास्ति न भिदा तद्विद्ययोरित्यमुम् ।
छिन्दन् संशयमन्तरामननमस्त्यन्यत्र तत्रापि तत्
भूतग्रामवदैकमत्यमिति तव्याचष्ट शुद्धात्मकम् ॥ २०५ ॥

॥ अथ व्यतिहाराधिकरणम् ॥

योहं सोसौ योसौ सोहं किमिह मतिः स्याद्व्यतिहृत्य न वा ।
सन्देहेऽस्मिन् सूत्रकृदाह व्यतिहारः स्यादितरवदत्र ॥ २०६ ॥

॥ अथ सत्याधिकरणम् ॥

द्वे विद्ये भवतोऽथवा ननु मतैरैक्यं महद्यक्षमि-
त्यादित्ये च सनामसत्यविषयाभेदोऽस्त्यतुल्यात्फलात् ।

तस्मादभिन्नान्येवेति मननानि जगौ मुनिः ।
यथाश्रयं ह्याश्रितानामनुवृत्तेरवारणात् ॥ २१६ ॥

॥ अथ भूम्नः क्रतुवज्ज्यायस्त्वाधिकरणम् ॥

वैश्वानरः किमु विशिष्ट उपासनीयः
किं वा पृथक् पृथगिति प्रकृते विचारे ।
भूमैव युक्ततर इत्युपसंजहार
मूर्धादिमावयवयुग्भुवनं विराजि ॥ २१७ ॥

॥ अथ नानाशब्दादिभेदाधिकरणम् ॥

शाण्डिल्यदहरमुख्याः विद्या भिन्ना नवेति विशयेऽस्मिन् ।
शब्दादीनां भेदात् नानात्वं तासु निश्चितं मुनिना ॥ २१८ ॥

॥ अथ विकल्पाधिकरणम् ॥

एकैव कर्तुमुचिता मतिरत्र किं वा
स्वेच्छानुसारमपि पञ्चषधीविशेषाः ।
इत्थं विकल्प्य वदतिस्म मुनिर्व्यवस्थां
एकस्य तुल्यफलकत्वसमर्थनेन ॥ २१९ ॥

॥ अथ काम्याधिकरणम् ॥

काम्यास्तु कर्तुमुचिता यदि वा यथेच्छं
एकैव वेति विशये सति पूर्ववादी ।
पूर्वेण तुल्यमिति शङ्कितवांस्तमाह
काम्या यथेच्छमिति नात्र विकल्प इष्टः ॥ २२० ॥

॥ अथ अङ्गेषु यथाश्रयाधिकरणम् ॥

होत्रुद्गातृमुखोक्तेरुपगमः किं भिन्न एवाथवा
ह्येकः स्यादिति संशये सति यथाह्यङ्गाश्रयत्वं स्थितम् ।
तं प्रत्याह यथाश्रयत्वनियमो नैकेन रक्षा भवेत्
अन्येषामिति सूत्रकृत्खलु न वेत्यस्मिंस्तु सूत्रे ब्रुवन् ॥ २२१

इति श्री ब्रह्ममीमांसात्रिशत्यां तृतीयाध्याये
॥ तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

॥ अथ पुरुषार्थाधिकरणम् ॥

पुरुषार्थोऽतः शब्दादिति मनुते बादरायणो मौनी ।
न खलु ज्ञानं कर्मण उपैतुमङ्गत्वमर्हति श्रेष्ठम् ॥ २२२
यावज्जीवं जुहुयादितिवचनं त्वज्ञविषयविश्रान्तम् ।
यस्मात्संन्यासं श्रुतिरात्मज्ञानाय विदधाति ॥ २२३
ज्ञात्वा कर्म करोतीति कर्मज्ञानं हि बोधयेत् ।
न त्वकर्त्रात्मकं ज्ञानं तेन तस्योपमर्दनात् ॥ २२४
शतमाभ्यां दीयतामित्युक्ते भङ्क्त्वैव दीयते ।
तथा विभागः कर्मात्मज्ञानयोरपि बुध्यताम् ॥ २२५
द्रव्यक्रियाकर्मसु या फलश्रुतिः
साह्यर्थवादत्वमुपैष्यतीति ।

पूर्वेपि तन्त्रे विदितं तथेदं
संस्कारविज्ञानमिति ब्रुवाणम् ॥ २२६

प्रत्याहाचार्यवर्यो न भवितुमुचितं ब्रह्मविज्ञानमेवं
यस्मात्तत्ज्ञातुरद्धा त्वभिदधति गिरो बन्धमुक्तिं फलं हि ।
प्रागेवैतच्चतुर्थे मुनिरभिहितवान् सूत्रवर्ये सुबुद्धे
तस्मान्नैवं विशङ्कां पुनरपि कलयेर्बुद्धिविस्मापयित्रीम् ॥ २२७

॥ अथ परामर्शाधिकरणम् ॥

परामर्शं मेने यतिपरवचो जैमिनि मुनिः
यतो नात्र श्रौती भवति विधिबोध्युक्तिघटना ।
विशिष्यैतन्निन्दत्यथ च सुतरां वीरहण इ-
त्यतो यावज्जीवं श्रतिविहितकर्मप्रवणता ॥ २२८ ॥

इति प्राप्ते सिद्धान्त्यवददुचिता न्यासविश्रयः
तुरीयश्चैषोस्त्याश्रमइति सदृष्टान्तवचनम् ।
यथानामाधस्तात्समिधमिति वाक्ये ऽभ्युपगतो
विधिर्निन्दावाचो मतिकृतगृहित्यागविषयाः ॥ २२९ ॥

॥ अथ स्तुतिमात्राधिकरणम् ॥

रसतमत्वमुखाश्च गुणाः किमु
स्तुतिरथो दधति स्मरणार्हताम् ।
इति विचार्य नुतित्वमपाकरोत्
मुनिरपूर्वतरत्वसुहेतुना ॥ २३० ॥

॥ अथ पारिप्लवाधिकरणम् ॥

सर्वाः पारिप्लवार्था उपनिषदुदिताः स्युः कथाह्यश्वमेधे
सामान्येनाभिधानाद्ग्रहणमुचितमासामतो नात्मनिष्ठाः ।
इत्येवं पूर्वपक्षे प्रसरति मुनिराडाह सूत्रे विशेषात्
त्रीण्येवाख्यानकानि ग्रहणमनुभवन्तीत्यतो ज्ञाननिष्ठाः ॥

॥ अथ अग्नीन्धनाधिकरणम् ॥

पुरुषार्थोऽतः शब्दादिति यत्पूर्वं प्रसाधितं युक्त्या ।
अत एव च नाग्नीन्धनमुखकर्मापेक्षते ज्ञानम् ॥ २३२ ॥

॥ अथ सर्वापेक्षाधिकरणम् ॥

मुक्तौ यद्यपि कर्मणां न सुवचा सापेक्षता विद्यया
तज्जन्मापि तु कर्मणैव भविता यज्ञादिवाचस्तथा ।
तेषामप्युपयोगमाहुरतुलां सत्वस्य शुद्धिंपरां
आधायोपकरोति सर्वमपि चाधानादिकं मुक्तये ॥ २३३ ॥

॥ अथ सर्वान्नानुमत्यधिकरणम् ॥

सर्वान्नानुमतिः श्रुता हि भगवंश्छन्दोगवाजिश्रुति-
ष्वेषा किन्नु करोति मुक्त्युपकृतिं शान्त्यादिवत् किं न वा ।
इत्येवं विशये करोत्युपकृतिं शास्त्रादिति प्रापितः
पूर्वः पक्ष उवाच तत्र मुनिराट् प्राणात्यये तद्विधिम् ॥ २३४

॥ अथ आश्रमकर्माधिकरणम् ॥

तमेतमिति वाक्येन कर्मणां द्विः प्रयोज्यताम् ।
आशङ्क्याश्रमकर्मापि भवतीत्यब्रवीद्विधेः ॥ २३५ ॥

अनित्यनित्यसंयोगः खादिरे सम्मतोऽस्त्यतः ।
तान्येवोभयलिङ्गैश्च ज्ञानायेत्यवदन्मुनिः ॥ २३६ ॥

॥ अथ अन्तराचाधिकरणम् ॥

विधुरकृतकर्मणां किं विद्यायामस्त्युपक्रिया नो वा ।
इति विशये वदति मुनिस्तेषामप्यन्तरङ्गशोधकताम् ॥ २३७ ॥

वाचक्नवीरैक्वमुखा अन्तराले स्थिता अपि ।
दृश्यन्ते ज्ञानिनः किन्तु विशेषानुग्रहो गृहे ॥ २३८ ॥

॥ अथ तद्भूताधिकरणम् ॥

तद्भूतो यदि केनचिच्च विधिना तद्भिन्नभावं भजेत्
तेनानुष्ठितकर्म किन्नु भजति ज्ञानोपकारं न वा ।
इत्थं संशयमुत्थितं परिहरत्याचार्यवर्यः स्वयं
शिष्यस्यापि च सम्मतं खलु वदन् नेत्येव हेतुत्रयात् ॥ २३९

नियमोऽतद्रूपत्वं स्वाचाराभाव इत्यपि त्रितयम् ।
पतितास्ते हि भवेयुः कर्म कृतं तैः कथंस्विदुपकुर्यात् ॥ २४०

॥ अथ आधिकारिकाधिकरणम् ॥

षष्ठाध्यायनिरूपितं भवति यत्स्याद्वावकीर्णिव्रत-
प्रायश्चित्तममुष्य नेति विशये नेत्याह सूत्रे मुनिः ।
पातित्यस्मृतितस्त्वयुक्तमपि चाशुद्धत्वहानिस्ततः
पूर्णा नास्ति यतः स्मरन्ति मुनयस्तेषामिहत्याज्यताम् ॥

॥ अथ बहिस्तूभयथाधिकरणम् ॥

उपपातकिता तेषां महापातकितापि वा ।
बहिरेव भवेयुस्ते शिष्टाचारात्स्मृतेरपि ॥ २४२ ॥
अतस्तैर्यत्कृतं कर्म तत् ज्ञाने नोपयुज्यते ।
इति व्यासोऽब्रवीत्स्पष्टं नावरोहस्ततो मतः ॥ २४३ ॥

॥ अथ स्वामिनः फलश्रुत्यधिकरणम् ॥

किं स्वामिकर्तृकमिदं क्रतुचिन्तनं स्यात्
किं वार्त्विजं भवति संशयिते सतीत्थम् ।
आत्रेयपक्षमवधूय विनिर्णिनाय
ह्यार्त्विज्यमित्यथमुनिः श्रुतितश्च युक्तेः ॥ २४४ ॥

॥ अथ सहकार्यन्तरविध्यधिकरणम् ॥

मौनं किन्नु विधीयतामुत न वेत्येवं स्थिते संशये
न प्राप्त्या विधियोग्यतेति वदति प्रत्याकरोत्तं मुनिः ।
अस्त्येवास्य विधिक्षमत्वमितरैस्तुल्यं यतो नाप्तता
पक्षेणास्य भवत्यतो भवति हि ध्याने विधिः पाक्षिकः २४५

॥ अथ अनाविष्कुर्वदधिकरणम् ॥

बाल्यं किं मननं भवेदुत भवेद्दम्भादिनिर्मुक्तते-
त्येवं संशयिते मुनिर्वदति तन्निर्णीतिमत्राञ्जसा ।
यन्नाविष्कुरुते मनो विकृतिमित्येवं च भक्त्या भवेत्
बाल्यं दम्भविमुक्ततेति बलवत्त्वं वा भवेन्नैडता ॥ २४६

॥ अथ ऐहिकाधिकरणम् ॥

किञ्चैतच्छ्रवणादिसाध्यमपि विज्ञानं किमस्मिन्भवे
किं वेदं जननान्तरे प्रभवितेत्येवंविधे संशये ।
यत्र प्रस्तुतरोधकं न भवति स्यात्तत्र तद्ध्यैहिकं
नो चेदन्यभवे पुनस्तु भविता तद्दर्शनादित्यगात् ॥ २४७

॥ अथ एवं मुक्तिफलानियमाधिकरणम् ॥

एवं मुक्तिफलेषु नास्ति नियमः कालस्य यस्मादियं
ज्ञानानन्तरभाविनी न तु भिदा मुक्तौ सुसूक्ष्मापि च ।
तस्मात्साधनतारतम्यवशतो ज्ञाने विलम्बेपि तत्-
साध्याज्ञाननिवर्तने न चिरता युक्ता भवेत्तद्विदाम् ॥ २४८

अध्यायेन तृतीयेन साधनं सम्यगीरितम् ।
अथो तुरीयाध्यायेन फलचिन्तां करिष्यति ॥ २४९ ॥

इति श्री ब्रह्ममीमांसात्रिशत्यां तृतीयाध्यायः

॥ समाप्तः ॥

॥ अथ चतुर्थाध्याये प्रथमः पादः ॥

फलाध्यायेपि पूर्वानुवृत्तसाधनचिन्तना ।
क्रियते प्रथमे पादे सूत्रैः कैश्चिन्महर्षिणा ॥ २५० ॥

आवृत्तिः किमपेक्षिता श्रुतिमतिध्यानाभिधानां नवे-
त्येवं संशयिते सकृत्करणतः शास्त्रस्य सार्थक्यतः ।
नावृत्तिर्भवतीति वादिनमृषिः प्रत्याह सिद्धान्तयन्
आवृत्तिस्त्वसकृद्यतः श्रुतिशिखास्वेवोपदेशस्तथा ॥ २५१ ॥

रश्मींस्त्वमावर्तयतादिति स पुत्रेऽस्ति तातेन कृतोपदेशः ।
ततोऽप्युपासाविधिचोदितानामावृत्तिरिष्टाद्यवधातनीत्या ॥

॥ अथ आत्मेतितूपगमाधिकरणम् ॥

किं वा तत्वमसीति गीः प्रभृतयः स्वात्मग्रहं शासति
स्वस्वामित्वमुतेरयन्ति सहजं जीवेशयोः किंन्विति ।
सन्देहे सति पूर्वपक्षनवदद्भेदेन दृष्टिस्तयोः
यस्मात्तद्विरहे भवेद्विफलता शास्त्रस्य सर्वस्य च ॥ २५३ ॥

एतं पक्षमदूषयत्खलु मुनिः स्वात्मग्रहोपायनं
तत्त्वंग्राहयतिस्म वेदवचनं तत्सूत्रयन् सूत्रकृत्
निन्दां भेदमते प्रदर्श्यपुरतस्तद्दर्शितं दोषम-
प्यङ्गीकृत्यभिदां जहार जगतोऽनिर्वाच्य मायाकृताम् । २५४

॥ अथ न प्रतीकाधिकरणम् ॥

श्रूयन्ते बहुधा प्रतीकविषयाण्यादित्यनामादिगानि
अन्यान्यप्यथ चोदितानि ननु विज्ञानानि तेष्वात्मनः ।
कर्तव्या किमु बुद्धिरित्यभिपतन् पक्षः प्रतिक्षिप्यते
नैतेष्वात्ममतिर्विधातुमुचिता ह्यालंबनं यन्नसः ॥ २५५ ॥

॥ अथ ब्रह्मदृष्ट्यधिकरणम् ॥

नामब्रह्मेत्यादौ नाम्नि किमु ब्रह्मधीरुतैतस्मिन् ।
नामादिबुद्धिरुचितेत्येवं सति संशये मुनिः प्राह ॥ २५६ ॥

उत्कर्षात्परमात्मदृष्टिरितरे नाब्रह्मदृष्टिः परे
लोके क्षत्तरि राजदृष्टिरुचिता न क्षत्तृदृष्टिर्नृपे ।
युक्तं चैतदतोन्यथा तु करणे ब्रह्मत्वहानेः फलं
शास्त्रोक्तं सुलभं भवेन्नमतिमन्वीक्षस्व बुद्ध्या चिरम् २५७

॥ अथ आदित्यादिमत्यधिकरणम् ॥

आदित्यादिमतिर्हि कर्तुमुचिता कर्माङ्गभूतेषु नो
कर्माङ्गत्वमतिः कदापि सुकरा ह्यादित्यपृथ्व्यादिषु ।
तत्त्वेह्येव तदात्मकत्वकलनात्तद्ध्यानजन्यं फलं
शक्यं भावयितुं न चास्ति परथा युक्तोपपत्तिस्सखे २५८

॥ अथ आसीनाधिकरणम् ॥

तिष्ठन् शयान आसीनो ध्यानं कुर्याच्चलन्नुत ।
निरणैषीद्विकल्प्यैवं आसीनः सम्भवादिति ॥ २५९ ॥

॥ अथ यत्रैकाग्रताधिकरणम् ॥

वेदे चोदितकर्म यद्भवति तत्प्राच्यादिदिक्पूर्वकं
किन्त्वेवं मननादिकं च भविता किं वाऽविशेषादिति ।
सन्देहं तमिमं निरस्यति मुनिः यत्रैव चैकाग्रता
तत्रेति स्वमतं वदन् खलु समे शुद्धे मनःशान्तिदे ॥ २६०

॥ अथ आप्रायणाधिकरणम् ॥

आप्रायणात्किमु सकृत् त्रिचतुर्गुणं वा
ब्रह्मात्मगोचरमिदं श्रवणादिसाध्यम् ।
एवं विकल्प्य वदतिस्म मुनिः स्वपक्षं
आप्रायणादिति तदापि हि दृष्टमेतत् ॥ २६१ ॥

॥ अथ तदधिगमाधिकरणम् ॥

ज्ञानाधिगमे सञ्चितमागामि च लीयते न च श्लिष्येत् ।
तद्व्यपदेशाद्वेदस्मृत्योरित्याह तापसश्रेष्ठः ॥ २६२ ॥

॥ अथ इतराश्लेषाधिकरणम् ॥

पुण्यं नैव विनंष्टुमर्हति यतो न श्रौतयोर्वैरिता
पुण्यश्चश्रुतमेव वेदनमपि श्रौतं न वैरं तयोः ।
आक्षेपं तमपाकरोति मुनिराट् न्यायातिदेशेन नो
पुण्यं श्लिष्यति पापवत् श्रुतिवशात् पातप्रतीक्षाकृतेः ॥ २६३

॥ अथ अनारब्धकार्याधिकरणम् ॥

अनारब्धे पुण्यपापे नश्यतो नेतरे इति ।
तस्यावधिविधानेन निर्णिनायेति तापसः ॥ २६४ ॥

॥ अथ अग्निहोत्राद्यधिकरणम् ॥

नित्याग्निहोत्रमपि तस्य कृते विधेय-
मित्याह तापसवरः श्रुतिमीक्षमाणः ।
अर्थद्वयं दिशति कल्पतरुश्च तस्य
ज्ञानाङ्गतामपि विमुक्ति सहायताञ्च ॥ २६५ ॥

॥ अथ यदेवविद्याधिकरणम् ॥

यदेव विद्यया भवेत्तदेव वीर्यवत्तरं
श्रुतिर्ब्रुवन्त्यूरीचकार केवलाच्च कर्मणः ।
निजं फलं तमेतमित्युपात्तपापशोधनात्
ततः क्रियेत नित्यकर्म तत्त्वबोधलिप्सुभिः ॥ २६६ ॥

॥ अथ भोगेनत्वितराधिकरणम् ॥

प्रारब्धे क्षपयित्वा भोगेनैवाथ तत्त्वविद्भवति ।
आत्मनि सम्पन्नो न तु नाशकमाकाङ्क्षते ततोऽप्यन्यत् ॥ २६७

इति श्री ब्रह्ममीमांसा त्रिशत्यां चतुर्थाध्याये
॥ प्रथमः पादः समाप्तः ॥

॥ अथ द्वितीयः पादः ॥

फलं चिन्तितमाद्येऽङ्घ्रावुत्क्रान्तिश्चिन्त्यतेऽधुना ।
पाराशर्येण मुनिना श्रुतितात्पर्यसिद्धये ॥

॥ अथ वाङ्मनसीत्यधिकरणम् ॥

छान्दोग्ये ननु गीयते मनसि वाक् सम्पद्यते प्रायणे
तत्राशङ्कि परैरिदं कथमिति स्यात्कारणे कार्यकम् ।

लीयेतेति न कार्यमेतदिति च व्यासः समाधात् पुनः
वृत्तिः सम्परिशिष्यते हि मनसो वाग्वृत्तिरालुप्यते ॥ २६८

॥ अथ मनः प्राणाधिकरणम् ॥

मनोवृत्तिः प्राणवृत्तौ स्थितायां लीयते त्विति ।
उत्तरस्मिन्नतिदिशत्येकवाक्यत्वसिद्धये ॥ २६९ ॥

॥ अथ सोऽध्यक्षाधिकरणम् ॥

सोऽध्यक्षे ननु लीयते त्विति जगौ व्यासः पुराणो मुनिः
कस्तस्यार्थ इति श्रुतार्थरसिको ऽभाषिष्ट भाष्यं गुरुः ।
भूतोपाधिक जीवशेषमितरे प्राणाविलीना इति
त्र्यात्मत्वेन समस्तभूत विलयं चाम्नायवागाक्षिपेत् ॥ २७०

॥ अथ समानाचासृत्यधिकरणम् ॥

सेयं गतिः किमु विदामपि विद्यतेथ
किं ध्यायति प्रवण चेतस एव भूयात् ।
एवं विचार्य मुनिराह समान भाव-
मासृत्युपक्रममितेरुभयत्र किन्तु ॥ २७१ ॥

अमृतत्वं पुनरेषामदग्धबीजात्मकं सगुणभावम् ।
प्राप्तानामापेक्षिकमिति च विवव्रे मुनिः स्वसिद्धान्तम् ॥ २७२

॥ अथ तदापीत्यधिकरणम् ॥

सत्सम्पत्तिर्ज्ञानिनामेव युक्ता काचात्रेयं प्रोच्यते ज्ञानहीने ।
इत्याक्षेपे सम्प्रधार्याहतस्य श्रेष्ठां शान्तिं सूत्रकारः स सूत्रे ॥
तदापीतेस्तु संसारव्यपदेशादिति ब्रुवन् ।
संसारनाशपर्यन्तं ज्ञानात्त्वात्यन्तकी यतः ॥ २७४ ॥

॥ अथ प्रतिषेधाधिकरणम् ॥

देहापादानकं किं भवति निरसनं प्राणनिष्ठापसृप्तेः
किं वा जीवादितीमं विशयमुपगतं सम्प्रधार्याथ योगी ।
शारीरादेव युक्तं तदिति परमतं दूषयन् स्वीयपक्षं
देहापादानकं तद्वदति मुनिवरः स्पष्टमेकीयवाक्यात् २७५

॥ अथ कलाप्रलयाधिकरणम् ॥

कलानांप्रलयो नाम भूतेषु स्यात्परेऽथवा ।
भूतेष्विति च लोकोक्तिः निगमोक्तिः परे त्विति ॥ २७६ ॥

॥ अथ अविभागाधिकरणम् ॥

अविभागो वचनादिति विशिष्य कथयन्नुवाच पूर्वेषाम् ।
वृत्तिलयं त्वत्र पुनः स्वरूपतो विलयनं च वेदार्थम् ॥ २७७ ॥

॥ अथ तदोकोग्राधिकरणम् ॥

हार्दं ब्रह्म सदैव चिन्तयति यः तुल्यार्चिराद्यागतिः
स्यादित्यत्र हि संशये सति मुनिः प्राहस्म निर्णायकम् ।
स ह्योकोग्रविदारणेन महितो मूर्धन्य नाड्यापरं
यातीशानुगृहीत इत्यधिगतेर्ध्यानस्य योगेन च ॥ २७८ ॥

॥ अथ रश्म्यधिकरणम् ॥

पूर्वोक्तो रश्मिसारो निशि किमपि भवेत् घस्रएवेति जातं
सन्देहं सूत्रतोऽस्यन् प्रणिगदति मुनिः रात्रिकालेपि सत्त्वम् ।
ग्रीष्मे तापोपलब्धेर्भवति हि सवितू रश्मि सम्बन्ध इत्या-
द्याचार्यस्तत्प्रतीक्षां परिहरति पुनर्युक्तिजालैः समूलैः २७९

॥ अथ दक्षिणायनाधिकरणम् ॥

अत एव दक्षिणायनकाले ऽप्येषामुदग्गतिर्युक्ता ।
भीष्मप्रतीक्षणादिकमपि शिष्टाचारपालनाद्यर्थम् ॥ २८० ॥

इति श्री ब्रह्ममीमांसा त्रिशत्यां चतुर्थाध्याये

॥ द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

तृतीयेन च पादेन गतिगन्तव्य निर्णयम् ।
करोतिश्रुतितात्पर्यं निर्णयन्बादरायणः ॥

॥ अथ अर्चिराद्यधिकरणम् ॥

किं वार्चिरादिगतिरेकविधैव किं वा
नानाविधा गतिरिति प्रकृते विचारे ।
नानात्वपक्षपरिहारपुरःसरं त-
देकत्वमाह खलु तत्प्रथितेरितीज्यः ॥ २८१

॥ अथ वायुमब्दाधिकरणम् ॥

वायुः कुत्रनिवेशनीय इति सञ्छिन्दन्निमं संशयं
त्वब्दानन्तरमादितश्च तरणेः ग्राह्यं मुनिः प्राब्रवीत् ।
यस्मात्केचिदमुं विशेषरहितं विख्यापयन्तीतरे
वायोः खं सवितुर्युदाहुरमुना वैशेष्ययोगादिति ॥ २८२ ॥

॥ अथ तडिदधिकरणम् ॥

विद्युतोऽनन्तरं ग्राह्यान् वरुणेन्द्रप्रजापतीन् ।
सम्बन्धाद्वरुणस्यादावागन्तुत्वादथोभयोः ॥ २८३ ॥

॥ अथ आतिवाहिकाधिकरणम् ॥

किं वार्चिरादय इमे ननु मार्गचिह्ना-
न्याहोनु भोगधरणिः किमु चेतना वा ।
इत्थं विचिन्त्य पुरतोद्वितयं निरस्य
सिद्धान्तमाह चरमं मतमात्मपक्षम् ॥ २८४ ॥

तल्लिङ्गादित्याह श्रुतिलिङ्गं स्मृतिगतं च यल्लिङ्गम् ।
एकीकृत्यातिवहनकर्तृत्वं साधयन्मुनिस्तानि ॥ २८५ ॥

॥ अथ कार्याधिकरणम् ॥

गतिं विचार्य गन्तव्यं विचारयति तापसः ।
शुद्धं किमथवा कार्यं प्राप्तुं युक्तमुपासकैः ॥ २८६ ॥

मेने जैमिनिरत्र मुख्यमनघं प्राप्यं परोपासकैः
तन्नात्यन्तशुभं यतस्तु बहुता तेषां फलेषु श्रुता ।
गन्तव्यत्वमपि प्रकाममिह नो युज्येत शुद्धे यतः
कार्यं बादरिराह तत्र सुतरां गत्यादिकं ह्याञ्जसम् ॥ २८७

॥ अथ अप्रतीकालम्बनाधिकणम् ॥

प्रतीकोपसकानाञ्च तटिल्लोकावधिर्गतिः ।
अहंग्रहकृतामेव ब्रह्मलोकं मुनिर्जगौ ॥ २८८ ॥

इति श्री ब्रह्ममीमांसा त्रिशत्यां चतुर्थाध्याये
॥ तृतीयः पादः समाप्तः ॥

॥ अथ चतुर्थः पादः ॥

॥ अथ संपद्याविर्भावाधिकरणम् ॥

विचार्य गतिगन्त्व्यौ मुक्तिरूपं निरूप्यते ।
सद्यः क्रमश इत्येतदवान्तरविभेदतः ॥

छान्दोग्ये श्रूयते यत्परपुरुषमितः स्वेन रूपेण भूयात्
इत्यत्तस्वीयरूपं भवति किमथवाऽऽगन्तुकं वेति वीक्ष्य ।
सम्पद्याविर्भवो हि स्वकमुपगमितुर्नान्यदीयं तु नूनं
तत्त्वे हि स्वेनशब्दो भजति विफलतां कृत्रिमं यत्स्वकीयम्

॥ अथ ब्राह्मेणाधिकरणम् ॥

ब्राह्मेण वा भवति किन्नु चितेति किं स्वित्
सम्पत्तिवाक्यविशये प्रबले स पूर्वम् ।
मीमांसको वदति पूर्वमतं चितोडु-
लोम्नः सुतः कथितवान्मुनिरात्मपक्षम् ॥ २९० ॥

सिद्धान्तमाह हि पराशरसूनुरत्र
द्वैविध्ययोगमविरोधनयेन सम्यक् ।
ब्राह्मेण पूर्वभवनात्परतश्च चित्त्वात्
नास्तीति कश्चन विरोधकथावकाशः ॥ २९१ ॥

॥ अथ अविभागेन दृष्टत्वाधिकरणम् ॥

यस्माद्दृष्टफलं तत्त्वज्ञानेनाज्ञाननाशने ।
अविभागेन सम्पत्तिर्ब्रह्मणामुक्तिरिष्यते ॥ २९२ ॥

यदुक्तमविभागेनेत्यत्र कश्चन संशयः ।
जातस्तत्परिहारायाऽविभागेनेत्यसूत्रयत् ॥ २९३ ॥

॥ अथ सङ्कल्पादेवाधिकरणम् ॥

न्यायत्रयं शुद्धपरं अथ न्यायचतुष्टयम् ।
सगुण प्राप्तिविषयचिन्तापरमिति स्थितिः ॥ २९४ ॥
साङ्कल्पिकी भवेत्सृष्टिः ब्रह्मलोके तपस्विनाम् ।
तच्छ्रुतेरिति सिद्धान्तं प्रतिजज्ञे स्वयं मुनिः ॥ २९५ ॥

॥ अथ तन्वभावाधिकरणम् ॥

ये ब्रह्मलोकभाजः तेषां किं मानसोऽथ शारीरः ।
भोगः स्यादिति विशये जैमिनिमुनिबादर्षिमतभेदम् ॥ २९६ ॥
अवतारयन् स्वनिर्णयं आह मुनिर्द्वादशाहवद्व्यासः ।
उभयविधत्वं जाग्रत्स्वप्नवदिति चात्र दर्शयन्मानम् ॥ २९७ ॥

॥ अथ प्रदीपवदावेशाधिकरणम् ॥

स एकधेत्यादिगिरिश्रुतं यत्त्वनेकधात्वं कथमञ्जसा स्यात् ।
इतीक्षिते प्राह मुनिः स्वपक्षं प्रदीपवद्भावनिदर्शनेन ॥ २९८ ॥

॥ अथ जगद्व्यापाराधिकरणम् ॥

मुक्ताः किन्नु जगज्जनिप्रभृतिषु व्यापारभाजोऽथवा
नेत्येवंसति संशये न हि भवेत्सङ्कोचनं तच्छ्रियाम् ।
तस्मात्सर्वविधश्च तेष्वपि भवेदीशत्वमव्याहतं
प्राप्तं प्रत्यवदन्मुनिर्न हि जगद्व्यापारवर्जंत्विति ॥ २९९ ॥

अनन्याधीश्वराभूत्वा क्रमशो मुक्तिमेत्य च ।
नावर्तन्ते पुनरिमं नावर्तन्त इति श्रुतेः ॥ ३०० ॥

इत्थं श्री रङ्गनाथेन सूत्रार्थसुमगुम्भिता ।
त्रिशती ब्रह्मचिन्तायाः कण्ठे धार्या सतां मता ॥

इति आङ्गरै, ब्रह्मश्री रङ्गस्वामिशास्त्रिणः कृतिषु

॥ ब्रह्ममीमांसा त्रिशती समाप्ता ॥



नागेन्द्रभूषितकरात् नवमौक्तिकाभात्
चर्माम्बरात् सजलनीरदनीलकण्ठात् ।
चन्द्रार्कवह्निनयनात् गिरिजासहायात्
शम्भोःपरं किमपि तत्त्वमहं न जाने

ओं तत् सत्

शुद्धि पत्रिका

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
३	६	स्त्र्थता	स्त्यर्थता
४	६	संपात्ति	संपत्ति
४	१६	नान्त्यं	नन्त्यं
८	१०	एषोह्य	एषह्य
१३	१६	षदस्मा	षाऽस्मा
१४	१	क्षया	क्षाया
१५	१६	प्राणःयस	प्राणःस्या
१६	२	स्मद्ब्र	स्माद्ब्र
१६	१४	दुरितं	दुदित
१८	१	योऽध्या	याध्या
१८	११	न एतेन	नैतेन
२०	२०	षत्करीति	षत्करेति
२५	१	स्मन्	स्मिन्
२८	१	मोऽवा	मो वा
३१	१३	प्राणका जानतेति	प्राणजन्मादिमत्तां
४०	१७	हृति	हृति
४१	२	स्विति	स्त्विति
६४	८	बादर्षि	बादरिर्षि

लभ्यानि पुस्तकानि

१.	स्रग्धराभागवतम्	0 4 0
२.	लघुशङ्करसंहिता	1 0 0
३.	नामामृतरसायनम्	0 6 0
४.	ब्रह्मसूत्रस्तुतिशतकम्	0 8 0
५.	ईशावास्यमालिनी	0 2 0

Apply to

A. R. RENGASWAMY SASTHRI,

7, SOLAIAPPA MUDALIAR AGRAHARAM,

KUMBAKONAM.

(S. INDIA)